श्रीसोमनाथसंस्कृतविश्वविद्यालयशास्त्रग्रन्थमाला - ३
प्रधानसम्पादकः - प्रो. अर्कनाथचौधरी

नरकण्ठीरवशास्त्रिप्रणीतं

काव्यलक्षणम्

सम्पादकः

प्रो. वेम्पटिकुटुम्बशास्त्री

पूर्व-कुलपतिः, श्रीसोमनाथसंस्कृतयुनिवर्सिटी-वेरावलम्



श्रीसोमनाथसंस्कृतयुनिवर्सिटी-वेरावलम्- गुजरातम्

श्रीसोमनाथसंस्कृतविश्वविद्यालयशास्त्रग्रन्थमाला - ३
प्रधानसम्पादकः - प्रो. अर्कनाथचौधरी

नरकण्ठीरवशास्त्रिप्रणीतं

काव्यलक्षणम्

सम्पादकः

प्रो. वेम्पटिकुटुम्बशास्त्री

पूर्व-कुलपतिः, श्रीसोमनाथसंस्कृतयुनिवर्सिटी-वेरावलम्

श्रीसोमनाथसंस्कृतयुनिवर्सिटी-वेरावलम्- गुजरातम्

क्रोडपत्रनाम्ना व्यवह्रियमाणग्रन्थसमुदाय इव साहित्यशास्त्रेऽपि विचारणीयमेकमंशं स्वीकृत्य तदुपरि संभावितसकलकोटीनां शङ्कासमाधानप्रक्रियामाध्यमेन प्रदर्शनं कृत्वा स्वाभिमतपरिष्कारव्यवस्थापनमिदमनिदंपूर्वतया साधितं श्रीनरकण्ठीरवशास्त्रिभिः। लघुकायोऽप्यलघुविचारात्मकः ग्रन्थ एषः साहियशास्त्रे विरलातिविरल इति वक्तुं शक्नुमः।

लघुकायस्यास्य ग्रन्थस्य प्रतिकृतिरेका शोधकर्मणि मम मार्गदर्शकेभ्यः दिगन्तविश्रान्तयशोविभूषितेभ्यः पद्मभूषणबिरुदभाग्भ्यः तत्रभवद्भ्यः डा० राघवन्-महाभागेभ्यः मयाधिगता प्रायः चत्वारिंशद्वर्षपूर्वमेव। तेलुगुलिप्यां कागदोपरि लिखितममुं ग्रन्थं देवनागर्यां प्रतिलिपीकर्तुमहमादिष्ट आसम् तैः। ग्रन्थस्यास्य विचारसरणिगत- वैलक्षण्येनाकृष्टमना अहं समसमयं द्वितीयामपि प्रतिकृतिं निर्माय कालान्तरे गहनाध्ययनचिकीर्षया मत्सविधे समरक्षम्, व्यस्मरञ्च। बहुवर्षदशकानन्तरं राघवमहोदयानां जन्मशताब्द्युत्सवेषु तत्रभवत्या नन्दिनीमहाभागया सह वार्तालापसमये ग्रन्थस्यास्य प्रसङ्ग आगतः। तस्यास्सकाशात् ग्रन्थममुं राघवमहोदयैरप्रकाशितपूर्वं विज्ञाय तत्प्रकाशने कृतमतिरभवम्।

एकैव प्रतिकृतिः। त्रुटिता च सा। यथामति त्रुटितेषु स्थलेषु वर्णपूर्तिं विधाय ग्रन्थपातादिस्थलेषु बिन्दुपङ्क्तिचिह्नेन तत्प्रदर्शनञ्च विधाय काव्यलक्षणविचारपर्यन्तं भागं संशोध्य विदुषां करकमलयोरर्पयन्नस्मि। त्रिचतुराणि पृष्ठानीतोपि मातृकायामुपलभ्यन्ते। किन्तु प्रसक्तानुप्रसक्तरूपेणागतविषयाणां विचारात्मकानि तानीति, अपूर्णानीति, जीर्णतरा तत्र मातृकेति च ग्रन्थेऽस्मिन्नान्तर्भावितानि। ग्रन्थोऽसौ विशदटिप्पणी-सुविशदभूमिकादि-सापेक्ष इति स्थितमेव। किन्तु प्रकृते समयाभावमुपलक्ष्य यथास्थितमातृकामात्रमेव प्रकाश्यते। कालान्तरे शोधपत्रादि-माध्यमेन शेषपूर्तिर्भवेदित्याशासे।

वाराणस्यां श्रीजीमुद्रणालये कृताक्षरयोजनममुं सौहार्दसम्बन्धेन मह्यं प्रत्यर्पितवते नागरमहोदयाय कृतज्ञतां व्यक्तीकरोमि। अक्षरशोधने साहाय्यमाचरितवते प्रियसुहृदे डा० हरिवंशपाण्डेमहोदयाय स्वस्ति ब्रवीमि। सङ्गणकमाध्यमेनागतं वस्तु मुद्रणार्थमपेक्षितैः परिष्कारैः संस्कृतवते श्रीजानकीशरणाय, डा० पण्ड्याकार्तिकाय, प्रकाशितवते कुलसचिवाय डा० दशरथजादवाय यथोचितान्यभिनन्दनानि प्रकटयामि।

२५-०५-२०१५
वेरावलम्

संस्कृतसेवकः
प्रो. वेम्पटिकुटुम्बशास्त्री

Shree Somnath Sanskrit University Shastragrantha Series - 3
Chief Editor - Prof. Ark Nath Chaudhary

KĀVYALAKṢAṆAM

of

Narakaṇṭhīravaśāstrī

by

Prof. Vempaty Kutumba Sastry

Former Vice-Chancellor, Shree Somnath Sanskrit University - Veraval

Shree Somnath Sanskrit University - Veraval - Gujarat

काव्यस्य निर्दुष्टं तटस्थलक्षणं किं भवितुमर्हति इत्यत्र विचारक्रमे नानालङ्कारशास्त्रग्रन्थाः प्रणीताः । तत्तदलङ्कारशास्त्रग्रन्थेषु उपस्थापितानि लक्षणानि समाधृत्य खण्डनमण्डनसहितं नव्यन्यायसरण्यां प्रणीतं नवकण्ठीरवस्य काव्यलक्षणं नितरां पाठकानां कृते उपकारकं स्यादिति मे मतिः।

अल्पकायस्यापि ग्रन्थस्यास्य महत्त्वं वीक्ष्य श्रीसोमनाथसंस्कृत-विश्वविद्यालयेन शास्त्रग्रन्थमालाशृङ्खलायां प्रकाशनं विधाय मोमुदीमि।

०३.०५.२०१६
वेरावलम्

प्रो. अर्कनाथचौधरी
कुलपतिः

प्राकाशकीयम्

श्रीमता आचार्येण नरकण्ठीरवशास्त्रिणा प्रणीतस्य 'काव्यलक्षणम्' इत्याख्यस्य लघुग्रन्थस्यापि अमूल्यस्य सम्पादनं विश्वविद्यालयस्यास्य प्राक्कुलपतिना आचार्य वेम्पटिकुटुम्बशास्त्रिमहोदयेन कृतम्।

नव्यन्यायप्रवर्तकस्य आचार्यस्य मिथिलामणिभूतस्य गङ्गेशोपाध्यायस्य योऽयं नव्यन्याय-परिष्कारसरणिः सः पश्चात्कालिकान् सर्वशास्त्राचार्यान् प्रैरयत् तादृशशैल्यां ग्रन्थान् रचयितुम्। येन कस्यापि पदार्थस्य सूक्ष्मातिसूक्ष्मविवेचनं स्यादिति। पण्डितराजजगन्नाथोऽपि आह्लादकरे रसगङ्गाधरनामके अलङ्कारशास्त्रे इमां परिष्कारपद्धतिं समावेशयत्। इमामेव परिष्कार-पद्धतिमाश्रित्य 'काव्यलक्षणम्' इत्यस्य रचयितारोऽपि काव्यलक्षणपरीक्षणं विधाय स्वाभिमतं प्रकाशयन्ति समालोचयन्ति च काव्यलक्षणानि तत्तदाचार्यप्रतिपादितानि अस्मिन्ग्रन्थे।

मम्मटस्य 'तददोषौ शब्दार्थौ सगुणावनलङ्कृती पुनः क्वापि' इति प्रसिद्धं काव्यलक्षणं, किञ्च 'रमणीयार्थप्रतिपादकः शब्दः काव्यम्' इति पण्डितराजस्य काव्यलक्षणम्, आनन्दवर्धनः ध्वन्यालोके -

यत्रार्थश्शब्दो वा तमर्थमुपसर्जनीकृतस्वार्थौ । व्यङ्क्तः काव्यविशेषस्स ध्वनिरिति सूरिभिः कथितः॥ इति प्रतिपादयति।

अन्ये चाप्याचार्याः काव्यलक्षणत्वेन अलङ्काररीत्यादीनि अपि स्वीकुर्वन्ति।

प्रकाशकः -

डॉ. दशरथजादवः
कुलसचिवः
श्रीसोमनाथसंस्कृतयुनिवर्सिटी
राजेन्द्रभुवन रोड, वेरावलम् - ३६२ २६६
गीर-सोमनाथजनपदम्, गुजरातम्
दूरभाषः - ०२८७६ - २४४५३२, फेक्स : २४४४१७
E-mail: sssu.veraval@gmail.com
www.shreesomnathsanskrituniversity.info

समन्वयकः -

डॉ. कार्तिकपण्ड्या
संशोधनाधिकारी
श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

प्रथमं संस्करणम् - मई - २०१६

प्रतयः - ३५०

ISBN - 978-93-83097-15-9

मूल्यम् - ₹ 105-00

मुद्रकः -

सुदर्शन ग्राफिक्स
तिरुपति एवन्यु, पुष्पकुंज सोसायटी,
कांकरिया, अहमदाबाद - ३८० ०२८
गुजरात, भारत
दूरभाष : ०७९-२५४३०५६०

॥ सम्पादकीयम् ॥

तत्रभवतः सुगृहीतनामधेयस्य गङ्गेशोपाध्यायस्य तत्त्वचिन्तामणिग्रन्थस्य, गदाधरभट्टाचार्यकृतटीकानाञ्चाविर्भावादनन्तरं, नास्ति संस्कृतवाङ्मये तादृशं दर्शनं वा शास्त्रं वा विद्याप्रस्थानभेदो वा यत्र नव्यन्यायपरिष्कारसरणिः भाषा च नाधृते। तत्तद्दर्शनानां प्रमेयार्थपरिपोषणे संशयितभूमिकाप्येषा सरणि: प्रमेयार्थपरिष्करणे तु अनन्यगतिकरूपेणाश्रयणीयासीदिति तु वस्तुस्थितिः। तत्र प्रमुखं कारणमिदं यत् सरणिरेषा प्रतिपाद्यार्थप्रतिपादने सहजसिद्धसंशयदूरीकरणाय नितान्तमुपकरोति, यथा खल्वस्मिन्नभिनवे युगे सङ्गणकीयाः साङ्केतिकाः भाषाः। अत एव यस्मिन् शास्त्रे नियमानां व्यभिचरणं परिपालनेन सह समानयोगक्षेमं भवति, यत्र च अस्पष्टताकारकाणां तत्त्वानां जीवितमिति व्यपदेशः, तत्तादृशेऽलङ्कारशास्त्रेऽपि सरणिरेषा लब्धपदास्ते।

ध्वन्यालोकलोचन-कुवलयानन्दचन्द्रिका-अलङ्काररत्नाकरादिग्रन्थेष्व-वलम्बितैषा सरणिः पण्डितराजजगन्नाथस्य प्राचीनमतविमर्शने स्वमतव्यवस्थापने च नितान्तोपकारिणी जाता। शब्दार्थयोः काव्यत्वपक्षस्य खण्डने शब्दमात्रस्य काव्यत्वस्थापने च नव्यन्यायपरिष्कारसरणेः आश्रयणकारणात् लक्षणशरीरगत-लाघवमात्रसिद्धिरेव, न तु बुद्धिगतलाघवसिद्धिर्वा, प्रमेयार्थगतलाघवसिद्धिर्वा। प्रकारान्तरेणार्थस्यापि लक्षणशरीरप्रवेशात्। फलतः शब्दार्थयोः काव्यत्वाङ्गीकार-पक्षात् नातिविलक्षणः पण्डितराजस्य परिष्कारः। एवमेव अदोषौ-सगुणा-वितिदलद्वयस्य सार्थकताविषये प्रवृत्तस्यापि विचारस्य प्रमेयतया प्रतिपाद्यस्यार्थस्य पक्षद्वयेऽपि नास्ति, न भवितुमर्हति च सुमहद्वैलक्षण्यम्। परिष्कारसरणावेव भेदः। अर्थस्य विशेषणीभूतायाः रमणीयतायाः प्रयोजकतया तयोर्द्वयोरपि उभयापेक्षितत्त्वात्।

अतः अपेक्षितप्रमेयार्थसिद्धिमुपलक्ष्य प्राचीनकाव्यलक्षणस्यापि संभावितदोषपरिहारपूर्वकं परिष्कारकरणस्य आवश्यकतास्ति। किञ्च, 'तर्काप्रतिष्ठानात्' इति महर्षेर्वचनस्य सार्थकताप्युपपादनीया। उभयमिदं साधितं तत्रभवता नरकण्ठीरवशास्त्रिणा प्रकृते काव्यलक्षणे। नव्यन्यायपरिपाट्यां

Published by:

Dr. Dashrath Jadav
The Registrar
Shree Somnath Sanskrit University
Rajendra Bhuvan Road, Veraval - 362 266.
Dist.: Gir-Somnath, Gujarat, India.
Phone: 02876-244532, Fax: 02876-244417
E-mail: sssu.veraval@gmail.com
www.shreesomnathsanskrituniversity.info

Co-ordinator:

Dr. Kartik Pandya
Research Officer
Shree Somnath Sanskrit University, Veraval.

Edition	:	First
Year	:	May 2016
Copies	:	350
Price	:	₹ 105-00
ISBN	:	978-93-83097-15-9

Printed by:

Sudarshan Graphics
Tirupati Avenue, Pushpakunj Society,
Kankaria, Ahmedabad - 380 028
Gujarat, India.
Phone : 079-25430560

काव्यलक्षणम्

१. यस्माद्भवन्ति लोका येनोज्जीवन्ति यत्र लीयन्ते ।
तस्मै कस्मै चिदिदं भवतु परस्मै नमः पुरिशे ।।

२. प्रणमामि देशिकार्यान्कौशिकवर्यानशेषतन्त्रज्ञान्।
यत्करुणातरिमेत्य प्रायश्शास्त्रार्णवो मया तीर्णः ।।

३. तर्कालङ्कारवागीशकाशीनाथविपश्चिताम् ।
अस्मद्वंशावतंसानां महिमानं विचिन्तये ।।

४. प्राचीनार्वाचीनप्रबन्धनिचयान्विचार्य चारुधिया ।
वितनोमि काव्यलक्षणवादं सुधियां मनोविनोदाय ।।

५. नव्योद्भावितदोषाणां प्रत्याख्यानपुरस्सरम् ।
प्राचीनलक्षणस्यैव स्थापनाय ममोद्यमः ।।

तत्र तावत् काव्यपदशक्यतावच्छेदकं विचार्यते। ननु किं नाम काव्यपदशक्यतावच्छेदकम् ? न तावत्काव्यत्वम् । तस्य दुर्निरूपस्वरूपत्वात् ।

तद्धि न जातिः । तत्त्वे प्रमाणाभावात् । ननु शक्त्यादिजन्यतावच्छेदकतया तत्सिद्धिः। तथा हि काव्यत्वावच्छिन्नं प्रति शक्तिनिपुणताभ्यासानां त्रयाणामपि कारणत्वस्य अन्वयव्यतिरेकसिद्धत्वात् अनुगतानतिप्रसक्तकार्यतावच्छेदकं विना तदनिर्वाहेण, शक्त्यादिजन्यतां पक्षीकृत्य जन्यतात्वेन हेतुना किञ्चिद्रूपावच्छिन्नत्वसाधने सिध्यतो धर्मस्य जातित्वे लाघवमिति लाघवज्ञानसहकृतेनानुमानेन जातिसिद्धिः। सा च काव्यत्वमेव। अन्यस्या दुर्वचत्वात् । शक्त्यादीनाञ्च काव्यकारणत्वमुक्तं काव्यप्रकाशे—

शक्तिर्निपुणता लोकशास्त्रकाव्याद्यवेक्षणात् ॥
काव्यज्ञशिक्षयाभ्यास इति हेतुस्तदुद्भवे ॥

'शक्तिः कवित्वबीजभूतः संस्कारविशेषः। यां विना काव्यं न प्रसरेत्। प्रसृतं वा उपहसनीयं स्यात्। लोकस्य स्थावरजङ्गमात्मकलोकवृत्तस्य, शास्त्राणां छन्दोव्याकरणाभिधानकोशकलाचतुर्वर्गगजतुरगखड्गादिलक्षणग्रन्थानां, काव्यानां च महाकविसम्बन्धिनां, आदिग्रहणादितिहासादीनां च, विमर्शनाद् व्युत्पत्तिः, काव्यं कर्तुं विचारयितुं च ये जानन्ति तदुपदेशेन करणे योजने च पौनःपुन्येन प्रवृत्तिरिति त्रयस्समुदिताः न तु व्यस्ताः, तस्य काव्यस्योद्भवे निर्माणे समुल्लासे च हेतुः, न तु हेतवः' इति।

एवमेव काव्यप्रदीपकारोऽपि वृत्तिमनुरुन्धानो व्याचख्यौ। यथा 'शक्तिः कवित्वबीजभूतो देवताप्रसादादिजन्मा संस्कारविशेषः, प्रतिभाव्यपदेश्यः। तस्याः कारणतायां किं मानमिति चेत्—निपुणतादिकारणान्तरसद्भावेऽप्यनुपहसनीय-काव्यप्रसरस्य कार्यस्य व्यतिरेकः। स च विशेष्यस्य काव्यप्रसरस्य विशे(ष)णस्यानुपहसनीयत्वस्य वा व्यतिरेकात्सर्वत्राविशिष्टः। न चैवं कारणान्तरं किञ्चिदायातु, न तु शक्तिरिति वाच्यम्। प्रसिद्धातिरेकिण्येव तद्धेतौ शक्तिव्यपदेशात्। लोकः स्थावरजङ्गमात्मकलोकस्य वृत्तं, योगादुपचाराद्वा, धर्मिमात्रपरामर्शस्य व्युत्पत्त्यनाधायकत्वात्। शास्त्रं छन्दश्शास्त्रादि। काव्यं महाकविप्रणीतं रघुवंशादि। आदिग्रहणादितिहासादि, तेषां विमर्शनाद् व्युत्पत्तिः निपुणता, काव्यज्ञशिक्षा, काव्यं कर्तुं रसानुगुणतया प्रबन्धादौ घटयितुं च ये जानन्ति, तदुपदेशः तया करणे योजने च पौनःपुन्येन प्रवृत्तिरभ्यासः। इतिशब्दो मिलितोपस्थापनाय। अन्यथा तद्वैयर्थ्यमेव स्यात्। तथा च काव्यस्योद्भवः, उत्कृष्टोत्पत्तिः, तया कार्येण मिलितानामुपधानं, दण्डचक्रादीनामिव घटेन। न तु मिलितत्वेन कारणतैवेति भ्रमः कार्यः' इति।

अत्र त्रयस्समुदिता हेतुरिति वृत्तौ विशेष्यवाचकपदोत्तरविभक्ति-तात्पर्यविषयी-भूतबहुत्वसङ्ख्याविरुद्धस्यैकत्वस्य विशेषणवाचकहेतुपदोत्तर-विभक्त्या विवक्षितत्वात्, 'वेदाः प्रमाणम्', 'शतं ब्राह्मणाः', 'जात्याकृतिव्यक्तयः पदार्थः' इत्यादाविव नासमानवचनकत्वासङ्गतिः। यत्र विशेष्यवाचकपदोत्तर-

विभक्तितात्पर्यविषयसंख्याविरुद्धसंख्याया अविवक्षितत्वं तत्र विशेष्यविशेषणपदयोस्समानवचनकत्वनियमात् । अत्र व्युत्पत्तिवादे गदाधरः। 'एवं त्रयस्समुदिता हेतुरित्यत्र हेतुपदं कार्योत्पत्तिप्रयोजकतावच्छेदक-समुदायत्वावच्छिन्नपरम् । तादृशसमुदायत्वान्वित-मेकत्वमेकवचनार्थः। अत एव शक्त्यादीनां त्रयाणां तृणारणिमणिन्यायेन हेतुत्वशङ्कानिरासः। तथा सत्येषामेकैकसमवधानदशायामपि कार्योत्पत्तेरावश्यकतया त्रितयपर्याप्तसमुदायत्वस्य कार्योत्पत्तिप्रयोजकतानवच्छेदकतया तेषां त्रयाणां तथाविधसमुदाय-त्वाश्रयत्वानुपपत्तेः' इति । तेन च तादृशशक्त्यादि-त्रितयपर्याप्तसमुदायत्वस्य फलोपधायकतावच्छेदकत्वेऽपि शक्त्यादिवत्त्वैकमात्रनिष्ठधर्मस्यैव स्वरूप-योग्यतारूपकारणतावच्छेदकत्वं सूचितम् । अन्यथा दण्डचक्रादिसमुदायत्वस्य फलोपधायकतावच्छेदकत्वेन दण्डादिनिष्ठस्य दण्डत्वादिप्रत्येकधर्मस्य कारणतावच्छेदकत्वानुपपत्तेः । न चेष्टापत्तिः । दण्डो घटकारणमित्यादि-व्यवहारविरोधात्। तथा च तस्या जातेश्शक्यतावच्छेदकत्वेन न किञ्चिद्बाधकमिति चेत् - मैवम् । शब्दत्वादिना साङ्कर्यस्यैव जातित्वे बाधकत्वात् । सत्येकस्मिन्नपि बाधके साधकसहस्रस्यापि अकिञ्चित्करत्वेन बाधकाभावविशिष्ट-जन्यतावच्छेदकत्वादेरेव जातित्वसाधकत्वस्य स्वीकारात्।

अत एव शरीरत्वेन्द्रियत्वादेः पृथिवीत्वादिना साङ्कर्यात् न जातित्वमित्युक्तं न्यायतन्त्रे । साङ्कर्यञ्च परस्परात्यन्ताभावसमानाधिकरणयोः धर्मयोरेकत्र समावेशः । स्वसामानाधिकरण्यस्वाभावसामानाधिकरण्यस्वसमानाधिकरणात्यन्ताभावप्रतियोगित्व-एतत्त्रितयसम्बन्धेन जातिवैशिष्ट्यपर्यवसितः। प्रकृते च निर्दोषगुणालङ्कार-विशिष्टशब्दार्थयुगलस्य काव्यपदार्थत्वेन काव्यत्वस्य तदुभयसाधारण्येन शब्दत्वं विहाय काव्यत्वं निर्दोषगुणालङ्कारविशिष्टे अर्थे काव्यत्वं विहाय शब्दत्वमुदासीनघटपदादिशब्दे निर्दोषगुणालङ्कारविशिष्टशब्दे, तदुभय-समावेशरूपसङ्करः । न च निर्दोषगुणालङ्कारविशिष्टशब्दमात्रस्यैव काव्यपदार्थत्व-स्वीकारात् न साङ्कर्यावकाशः । तन्मात्रनिष्ठस्य काव्यत्वस्य शब्दत्वव्यभिचारित्वाभावादिति वाच्यम् । शब्दचित्रार्थचित्रभेदात् काव्यत्वस्य द्वैविध्याङ्गीकारेण अर्थचित्राख्यकाव्यप्रभेदेऽपि काव्यत्वजातिस्वीकारस्यावश्यकतया अर्थसाधारण्यस्य कल्पनीयत्वात् । तदुक्तं काव्यप्रकाशे 'शब्दचित्रं वाच्यचित्रमव्यङ्ग्यं त्ववधमं स्मृतम्' इति । अत्र

चित्रमित्यध्याहार्यम्। चित्रसामान्यकथनानन्तरमेव तद्विभागकथनस्योचितत्वात्। तद्धर्मव्याप्यधर्मप्रकारकज्ञानगोचरेच्छां प्रति तद्धर्मप्रकारकज्ञानस्य हेतुत्वात्। तेनाव्यङ्ग्यं काव्यमवरमधमम्। तच्चित्रमिति कथितमित्यर्थः। अव्यङ्ग्यं अस्फुटतरातिरिक्तव्यङ्ग्यरहितम्। तादृशं च अस्फुटतरव्यङ्ग्यसद्भावे व्यङ्ग्यमात्राभावे वा चित्रं गुणालङ्कारयोगि इति तदर्थः—उक्तञ्च ध्वन्यालोके— 'प्रधानगुणभावाभ्यां व्यङ्ग्यस्यैवं व्यवस्थिते। काव्ये उभे ततोन्यद्यत्तच्चित्रमभिधीयते। चित्रं शब्दार्थभेदेन द्विविधं च व्यवस्थितम्। तत्र किञ्चिच्छब्दचित्रं वाच्यचित्रमतः परं' इति। तथा च साङ्कर्यं दुर्वारमेव।

न च निर्दोषगुणालङ्कारविशिष्टशब्द एव काव्यम्। वैशिष्ट्यं च स्वाश्रयत्व-स्वाश्रयार्थप्रतिपादकत्वान्यतरसम्बन्धेन। तथा च, तथाविधार्थप्रतिपादकतयैव अर्थचित्राख्यकाव्यभेदस्य काव्यपदार्थत्वनिर्वाहात् काव्यत्वजातेः शब्दमात्रनिष्ठत्वेऽपि क्षत्यभावान्न साङ्कर्यप्रसक्तिरिति वाच्यम्। काव्यं श्रुतमित्यादिव्यवहारस्येव काव्यं ज्ञातमित्यादिव्यवहारस्यापि सार्वजनीनस्य दर्शनेन शब्दविशेषस्येव अर्थविशेषस्यापि काव्यपदार्थत्वस्वीकारस्यावश्यकत्वात्। विनिगमकाभावेन एकपरिशेषस्य दुष्करत्वात्। शब्दार्थयोरुभयोरेव रसाभिव्यञ्जकतायामविशेषात्।

अत उक्तं काव्यप्रकाशे 'सर्वेषां प्रायशोऽर्थानां व्यञ्जकत्वमपीष्यत' इति। उक्तञ्च ध्वन्यालोके 'यत्रार्थश्शब्दो वा तमर्थमुपसर्जनीकृतस्वार्थौ। व्यङ्क्तः काव्यविशेषस्स ध्वनिरिति सूरिभिः कथित' इत्यानन्दवर्धनाचार्यैः। अत्र लोचने श्रीमदाचार्याभिनवगुप्तपादाः — ''व्यङ्क्त इति द्विचनेनेदमाह यद्यप्यविवक्षितवाच्ये शब्द एव व्यञ्जकः तथाप्यर्थस्यापि सहकारिता न त्रुट्यति। अन्यथा अज्ञातोऽपि शब्दस्तद् व्यञ्जकस्स्यात्। विवक्षितान्यपरवाच्ये च शब्दस्यापि सहकारित्वं भवत्येव, विशिष्टशब्दाभिधेयतया विना तस्यार्थस्याव्यञ्जकत्वादिति, सर्वत्र शब्दार्थयोरुभयोरपि ध्वननव्यापारः। तेन यद्भट्टनायकेन द्विवचनं दूषितं तद्गजनिमीलिकयैव। अर्थश्शब्दो वेति तु विकल्पाभिधानं प्राधान्याभिप्रायेण। काव्यञ्च तद्विशेषश्चासौ, काव्यस्य वा विशेषः। काव्यग्रहणाद्गुणालङ्कारोपस्कृत-शब्दार्थपृष्ठपाती ध्वनिलक्षण आत्मेत्युक्तमिति'। त एव चान्यत्राप्याहुः—'न च काव्यशब्दानां केवलानां भावकत्वं, अर्थापरिज्ञाने तदभावात्। न च केवलानामर्थानां, शब्दान्तरेणार्प्यमाणत्वे तदयोगात्। द्वयोस्तु भावकत्वमस्माभि-

रेवोक्तम्—'यत्रार्थश्शब्दो वा तमर्थं व्यङ्क्त इत्यत्र' इति। किञ्च लोकोत्तरानिर्वचनीयार्थसार्थस्य कविप्रतिभामात्रकल्पितत्वेन शब्दादप्यर्थस्यैवाभ्यर्हितत्वात्। लौकिकघटपटाद्यनिर्वचनीयार्थसृष्टौ ब्रह्मण इव अलौकिकानिर्वचनीयकाव्यार्थसृष्टौ कवेरपि स्वतन्त्रत्वात् अर्थस्यापि काव्यपदार्थत्वं दुरपह्नवमेव। तदुक्तं प्रकाशे—'नियतिकृतनियमरहितां ह्लादैकमयीमनन्यपरतन्त्राम्। नवरसरुचिरां निर्मितिमादधती भारती कवेर्जयती'ति।

न च शब्दविशेषमात्रस्य वेदपदार्थत्ववत् शब्दविशेषमात्रस्य काव्यपदार्थत्वं स्वीक्रियते। तदुक्तं वेदभाष्ये माधवाचार्यैः 'इष्टप्राप्त्यनिष्टपरिहारयोरलौकिकमुपायं यो ग्रन्थो वेदयति स वेद' इति। अन्यत्रापि—'वेदो नाम वेद्यन्ते ज्ञाप्यन्ते धर्मार्थकाममोक्षा अनेनेति व्युत्पत्त्या चतुर्वर्गज्ञानसाधनभूतो ग्रन्थविशेषः, करणे घञ् बाहुलकादिति'। ग्रन्थो हि नाम विवक्षितयावदर्थप्रतिपत्त्यनुकूलाद्यवर्णप्रभृतिचरमवर्णपर्यन्तवर्णसमुदायः। तथा च वेदो ज्ञात इत्यादौ वेदशब्दस्य तदर्थलक्षणाया इव काव्यं ज्ञातमित्यादौ काव्यशब्दस्य तदर्थलक्षणायाः कल्पनीयत्वान्नानुपपत्तिरिति—वाच्यम्। सति मुख्यार्थे गौणत्वकल्पनाया अन्याय्यत्वात्।

वेदपदस्यापि शब्दार्थोभयवाचकत्वस्य स्वीकारात्।

तदिदमसूसुचयद्भगवान्पतञ्जलिर्महाभाष्ये 'तदधीते तद्वेदे'ति सूत्रे—'किमर्थमुभावप्यर्थौ निर्दिश्येते। योऽधीते वेत्त्यप्यसौ। यस्तु वेत्त्यधीतेऽप्यसौ। नैतयोरावश्यकस्समावेशः। भवति हि कश्चित् संपाठं पठति। न वेत्ति तथा। कश्चिद्वेत्ति। न च संपाठं पठतीति'। अत्र कैयटः 'यो हि यं ग्रन्थमधीते, स तं स्वरूपतोऽवश्यं वेत्ति। यश्च स्वरूपतो वेत्ति सोऽवश्यमधीत इति भावः। नैतयोरिति। अर्थावबोधो वेदनमभिप्रेतं न तु स्वरूपमात्रवेदनम्। तत्र परस्परव्यभिचारदर्शनात् उभयोपादानमित्यर्थः' इति[1]। तथा चोक्तं वैयाकरणसिद्धान्तमञ्जूषायां नागोजिभट्टैः कण्ठरवेणैव। यथा—'वेदत्वं तु सति सम्भवे शब्दार्थयोः पर्याप्तम्। स्तोभाक्षरेष्वर्थादर्शनात्सतिसम्भव इत्युक्तम्। नित्यानि छन्दांसीति पूर्वपक्षे यद्यप्यर्थो नित्य इति महाभाष्योक्तेः। वैदिकोऽर्थो वैदिकश्शब्द इति व्यवहारस्तु तद्घटकत्वाद्बोध्यः। तत्र पठत्यादिसमभिव्याहारे वेदशब्दादुपस्थितयोश्शब्दार्थयोर्मध्ये शब्दे अर्थो विशेषणम्। क्वचिदर्थे शब्दो

विशेषणम्। यथा वेदं व्याचष्ट इत्यादौ। क्वचिदुभयं समम्। यथा वेदं जानातीत्यादौ। इदमेवाभिप्रेत्य 'शब्दार्थौ काव्यं' इति प्रकाशकारैरुक्तम्। अत एव शब्दमात्रतात्पर्यके तदनुकरणेन वेदत्वमिति 'मतौच्छ' इति सूत्रभाष्ये उक्तम्। अर्थभेदादन्यत्वनिश्चय इति च कैयटेनोक्तम्। अत एवानुकरणे न शुच्यादिदेशस्वाध्यायादिकालनियमः, नापि शूद्राणामनुकरणश्रवणे प्रायश्चितम्। बालैः पठ्यमाने वेदे शब्दमात्रतात्पर्यकत्वाभावेन वेदत्वमस्त्येव। अत एव देशकालनियमस्तत्र शिष्टानाम्। अनुकरणे तु शब्दमात्रतात्पर्यकत्वेन तदर्थबोधाभावे तात्पर्येण च न दोषः। अत एव न कस्याप्यनुकरणादर्थबोधः। मूर्खाध्यापकबालादीनां च व्युत्पत्त्यभावात् नार्थबोधः। नैतावता बालैः पठ्यमानेऽर्थासंविधानं व्युत्पन्नस्य ततोऽर्थबोधात्।..........वेदत्वमखण्डोपाधिः। प्रमाणशब्दत्वार्थबोधकत्वघटितं तु न वेदत्वम्। तत्र प्रमाणशब्दत्वमनङ्गीकुर्वतां बौद्धानां वेदत्वव्यवहारात्। स्तोभाक्षरेष्वभियुक्तानां वेदत्वव्यवहाराच्च' इति।

किञ्च शब्दार्थयोर्वेदत्वमन्तरा 'एकपदा ऋक्' इत्यादौ गत्यन्तराभावो द्रष्टव्यः।

यद्येवमपि शब्दविशेषमात्रस्य काव्यपदार्थत्वे पक्षपातं न त्यजसि तर्ह्येमस्तु। तथापि कालिदासप्रभवतावच्छेदकवैजात्यादिना साङ्कर्यस्य दुर्वारत्वात्, काव्यत्वस्य जातित्वं दुर्वचमेव। तच्च वैजात्यं कालिदासजन्यपञ्चाशद्वर्णानुगतम्। तथा च तादृशवैजात्यं विहाय काव्यत्वं भवभूत्यादिकृतकाव्ये, काव्यत्वं विहाय तादृशवैजात्यं कालिदासोच्चरितोदासीनवर्णे, कालिदासकाव्ये च तदुभयसमावेशसम्भवात्।

न च - निरुक्तवैजात्यमेव न सिध्यति। कत्वगत्वादिना साङ्कर्यात्। तस्य पञ्चाशद्वर्णानुगतत्वाच्च, कत्वं विहाय तादृशवैजात्यं कालिदासोच्चरितखकारादौ। तादृशवैजात्यं विहाय कत्वं भवभूत्युच्चरितककारे, कालिदासोच्चरितककारे कत्वतादृशवैजात्ययोस्समावेशादिति—वाच्यम्। कालिदासप्रभवतावच्छेदक-वैजात्यस्य पञ्चाशद्वर्णसाधारणस्यैकस्यानङ्गीकारेऽपि कालिदासमात्रोच्चरित-ककारमात्रसामान्य एव स्वीकारेण कत्वव्यभिचारित्वासम्भवात्। न च तादृशवैजात्यकल्पने प्रमाणाभावश्शङ्क्यः। अनुभवस्यैव प्रमाणत्वात्। अत

एवावयवग्रन्थे चिन्तामणौ प्रतिज्ञात्वस्य जातित्ववादिमतमुपन्यस्य देवदत्त-प्रभवत्वादिना जातिसङ्करप्रसङ्गप्रदर्शनेन तन्निराकरणं गङ्गेश्वरोपाध्यायानां सङ्गच्छते। तथा च स्पष्टमुक्तं मञ्जूषायां नागोजिभट्टैरपि—शुकशारिका-नवनार्याद्युच्चारणव्यङ्ग्येषु तत्तदुच्चरितत्वानुमापकानि वैजात्यान्यपि वर्णनिष्ठानि विजातीयवायुसंयोगव्यङ्ग्यान्येवेति।

तादृश वैजात्यानङ्गीकारेऽपि कत्वादिनासाङ्कर्यस्यानपायात्। कत्वं विहाय खकाराद्यन्तर्भावेन काव्यत्वं, काव्यत्वं विहाय काव्यानन्तर्गतककारे कत्वं, काव्यान्तर्गतककारे तद्द्वयसमावेशात्।

तथा च काव्यत्वस्य जातित्वं [न] सम्भवदुक्तिकम्। एतेन - काव्यपदशक्यतावछेदकतया काव्यत्वजातिसिद्धिः, कार्यतावच्छेदकताया इव शक्यतावच्छेदकताया अपि जातिसाधकत्वात्। निरवच्छिन्नशक्यतायाः अप्रामाणिकत्वेन शक्यतायाः किञ्चिद्धर्मावच्छिन्नत्वनियमात्। किञ्च काव्यं काव्यमित्यनुगतप्रतीत्या तत्सिद्धिः। अनुगतप्रतीतेरनुगतधर्ममन्तराऽनिर्वाहात्। सा च तादृशशब्दार्थोभयसाधरणी इति—प्रत्युक्तम्। दर्शितदूषणगणग्रासात्। काव्यत्वस्यार्थवृत्तित्वे च असमवेतपदार्थसाधारण्येन जातित्वशङ्काया एवानवकाशाच्च।

नाप्यखण्डोपाधिः। तत्त्वे प्रमाणाभावात्।

नापि निर्दोषगुणालङ्कारविशिष्टशब्दार्थोभयत्वं तथा। तथा सति व्यासज्यवृत्तिधर्मान्य-प्रत्येकवृत्तिधर्मावच्छेदेन पर्याप्तिसम्बन्धेनावृत्तित्वात् शब्दचित्रार्थ-चित्रयोः काव्यप्रभेदयोः काव्यपदवाच्यत्वानुपपत्तेः। व्यासज्यवृत्तिधर्मावच्छिन्न-प्रतियोगिताकभेदस्य प्रत्येकधर्मावच्छेदेन सत्वेन घटो न घटपटोभयमित्यादिवत् शब्दार्थयोः प्रत्येकं नेदं काव्यमिति व्यवहारप्रसङ्गाच्च। न च तस्य स्वरूपसम्बन्धेन शक्यतावच्छेदकत्वस्वीकारान्न दोषः, व्यासज्यवृत्तेरपि काव्यत्वस्य स्वरूपसम्बन्धेन प्रत्येकस्मिन्नपि सत्त्वात्। तत्र तेन सम्बन्धेन तदवच्छिन्नप्रतियोगिताकभेदासत्त्वाच्च इति वाच्यम्। व्यासज्यवृत्तिधर्मस्य पर्याप्तिसम्बन्धेनैव प्रकारत्वमिति नियमात्। काव्यपदजन्यबोधे पर्याप्तिसम्बन्धेनैव व्यासज्यवृत्तेः काव्यत्वस्य प्रकारतया भानस्यावश्यमभ्युपगन्तव्यतया

पर्याप्तिसम्बन्धस्यैव शक्यतावच्छेदकतावच्छेदकसम्बन्धत्वस्यावश्यकत्वात् । तेन सम्बन्धेन तद्धर्मप्रकारकशाब्दबुद्धित्वावच्छिन्नं प्रति तेन सम्बन्धेन शक्यतावच्छेदकत्वप्रकारकतद्धर्मविशेष्यकशक्तिग्रहस्यैव कारणत्वात् । तादृशनियमानङ्गीकारे द्वित्वादेस्समवायादिना प्रत्येकमपि सत्त्वेन एको द्वाविति प्रत्ययापत्तिः । न चैको द्वित्ववानिति प्रतीतेः सर्वानुभवसिद्धायाः प्रमात्वानुरोधेन व्यासज्यधर्मस्य पर्याप्तीतरसम्बन्धेनापि प्रकारत्वमवश्यमभ्युपगम्यमिति वाच्यम् । तत्र मतुबर्थसमवायादेरेव प्रकारतया दोषाभावात् । स्पष्टं चेदं व्युत्पत्तिवादे ।

नापि तादृशशब्द-तादृशार्थान्यतरत्वं तथा । काव्यपदात्तदन्यतरत्वप्रकारक-बोधस्याननुभवात् । तादृशशब्दभिन्नत्वे सति तादृशार्थभिन्नं यद्यत्तत्तदव्यक्तित्वा-वच्छिन्नप्रतियोगिताकभेदकूटात्मकस्य तस्य असर्वज्ञदुर्विज्ञेयत्वाच्च । तादृशशब्दभिन्नत्वे सति तादृशार्थभिन्नत्वस्य सामानाधिकरण्यसम्बन्धेन तादृशशब्दभेदविशिष्टतादृशार्थ-भेदरूपतया विशेषणविशेष्यभावे विनिगमनाविरहेण तत्तद्व्यक्तित्वावच्छिन्नभेद-कूटस्यापि तादृशत्वेन च शक्यतावच्छेदकानन्त्यात् शक्त्यानन्त्यापत्तेश्च । न च तादृशशब्दभेद-तादृशार्थभेदैतदुभयावच्छिन्नप्रतियोगिताकस्यैकस्यैव भेदस्य शक्यतावच्छेदकतास्वीकारात् न दर्शितदोषोन्मेष इति वाच्यम् । गौरवस्य दुर्वारत्वात् । सम्भवत्यनुगतानतिप्रसक्तलघुधर्मे गुरुधर्मस्य शक्यतावच्छेदकत्वानु-धावनस्यान्याय्यत्वात् । अन्यतरत्वान्यतमत्वादेः शक्यानुगमकतास्वीकारस्य प्रामाणिकानभ्युपगतत्वाच्च । तथा सति हर्यादिपदे तदर्थानामिन्द्रचन्द्रादीनां तावदन्यतमत्वादिनानुगमस्य सुसम्पादतया तदुपेक्ष्य नानार्थताकल्पनस्य निर्बीजत्वापातात् ।

न च तादृशशब्दार्थयोर्द्वयोरेव काव्यपदार्थत्वस्यावश्यकतया विनिगमनाविरहेण शक्तिद्वयकल्पनान्न दर्शितदोषावसरः। हर्यादिपदवन्नानार्थत्वं काव्यपदस्यापीष्यत एव । गत्यन्तराभावादिति वाच्यम् । हर्यादिपदे गत्यन्तराभावेन नानाशक्तिकल्पनेन नानार्थत्वस्वीकारेऽपि काव्यपदे तत्कल्पनस्यानुचितत्वात् । गत्यन्तरस्य वक्ष्यमाणत्वात् ।

ननु गुणालङ्कारपरिष्कृतरसोल्लसितशब्दार्थसङ्घटने एव काव्यपदस्य रूढिशक्तिरङ्गीक्रियते । तच्च शब्दार्थयो......[ः रसोल्लासानु] [ः रसव्यक्त्यनु] कूलयोजनमेव । तदुक्तं ध्वन्यालोके—

वाच्यानां वाचकानां च यदौचित्येन योजनम् ।।
रसादिविषयेणैतत्कर्म मुख्यं महाकवेः ।।

वाच्यानामितिवृत्तविशेषाणां वाचकानां च तद्विषयाणां रसादिविषयेणौचित्येन यद्योजनं एतन्महाकवेः मुख्यं कर्म । अयमेव हि महाकवेः मुख्यो व्यापारः यद्रसादीनेव मुख्यतया काव्यार्थीकृत्य तद्व्यक्त्यनुगुणत्वेन शब्दानामर्थानां चोपनिबन्धनमिति । योगशक्तिश्च काव्यपदस्य कवेः कर्म काव्यमिति व्युत्पत्त्या ब्राह्मणादित्वात् ष्यङ्प्रत्ययान्तत्वेन कविकर्तृकव्यापारमात्रे। योगशक्यतावच्छेदकं च कविकर्तृकव्यापारत्वम् । तस्य च कविकृतगमनागमनादावतिप्रसङ्गात् तथाविधशब्दार्थसङ्घटनत्वस्य रूढिशक्यतावच्छेदकत्वस्वीकार आवश्यकः। पङ्कजादिपदवत् । तत्र हि पङ्काधिकरणकोत्पत्त्याश्रयत्वरूपपङ्कजनिकर्तृत्वस्य कुमुदादिसाधारण्यात् अतिप्रसङ्गवारणाय पद्मत्वस्य रूढिशक्यतावच्छेदकत्वमुररीकृतम्।

तथा च तस्य शक्यतावच्छेदकत्वेन न कापि क्षतिरिति न काव्यपदशक्ति[क्य]तावच्छेदकदुर्भिक्षमिति चेत् - मैवम् ।

शब्दार्थसङ्घटनस्य काव्यपदमुख्यार्थत्वे काव्यमधीते काव्यं शृणोति काव्यं जानातीत्यादि सार्वजनीनव्यवहाराणामनुपपत्तेः । अध्ययनश्रवणादेः शब्दार्थयोजनात्मकसङ्घटने बाधितत्वेनानन्वयात् । न च तत्र काव्यपदस्य शब्दार्थयोः लाक्षणिकतया नानुपपत्तिरिवाच्यम् । विश्वजनीनव्यवहाराणां अमुख्यत्वकल्पनस्यानुचितत्वात् । न च तादृशशब्दार्थसङ्घटनस्य काव्यपदार्थत्वासम्भवेऽपि काव्यपदशक्यतावच्छेदकत्वस्वीकारान्न दर्शितदोषावकाशः। पदपदार्थयोजनरूपस्य संघटनस्य शब्दतदर्थोभयसाधारणत्वादिति वाच्यम् । शब्दार्थोभयसाधारणस्यैकस्य योजनालक्षणसंघटनस्याप्रामाणिकत्वात् । तादृशशब्दकर्मकसंघटनस्य तादृशार्थकर्मकत्वाभावेनाप्रसिद्धेश्च । न च तादृशशब्दसङ्घटनतादृशार्थसंघटनोभयस्यैव शक्यतावच्छेदकत्वस्वीकारान्न क्षतिरिति वाच्यम् । तदुभयस्य तदन्यतरस्य वा शक्यतावच्छेदकत्वे गुणालङ्कारविशिष्टशब्दार्थोभयत्व-तदन्यतरत्वयोः शक्यतावच्छेदकत्वनिराकरणावसरोक्तदूषणानाम् अत्रापि दुष्परिहरत्वात् ।

कविकृतिविषयत्वरूपकविकर्मत्वस्य योगशक्यतावच्छेदकत्वं स्वीकृत्य तदनुरोधेन शब्दार्थयोरेव काव्यपदार्थत्वस्वीकारौचित्येन दर्शितरीतेरसारत्वात् ।

शब्दार्थयोरेव लोके काव्यपदप्रयोगप्राचुर्यदर्शनात् । काव्यं करोतीत्यत्रापि न सङ्घटनं काव्यशब्दार्थः । शब्दार्थविषयकत्वस्य कविकृतावक्षतत्वेन सङ्घटनार्थतां विनापि शब्दार्थविषयकत्वमादायैव तादृशव्यवहारनिर्वाहात् । तथा च काव्यपद-शक्यतावच्छेदकं दुर्निरूपमेवेति चेत्—अत्रोच्यते । दोषशून्यत्वे सति गुणालङ्कारवत्त्वमेव शक्यतावच्छेदकम् । तावन्मात्रस्य कुत्राप्यतिप्रसङ्गाभावेन इतरांशस्य शक्यतावच्छेदककोटौ निवेशे प्रयोजनाभावात्। तस्य च शब्दार्थोभयसाधारणत्वात्तदुभयस्य काव्यपदार्थतानिर्वाहः । श्रुतं काव्यं ज्ञातं काव्यं इत्यादि शब्दार्थोभयविषयकविश्वजनीनव्यवहारसामान्यनिर्वाहश्च । न च दोषशून्यत्वे सति गुणालङ्कारवत्वस्य सामानाधिकरण्यसम्बन्धेन दोषविरहविशिष्टगुण-विशिष्टालङ्कारवत्त्वरूपतया विशेषणविशेष्यभावे विनिगमनाविरहेण दर्शितसम्बन्धेन दोष[विरह]विशिष्टालङ्कारविशिष्टगुणवत्त्वस्यापि शक्यतावच्छेदक-त्वापत्त्या शक्यतावच्छेदकभेदात्, शक्ततावच्छेदकैक्याच्च, एकशक्ततावच्छेदककत्वे सति विभिन्नशक्यतावच्छेदककत्वरूपनानार्थत्वापत्तिरिति वाच्यम् । नानाशक्तिमत एव नानार्थत्वात् । अन्यथा स्वर्गधेन्वादिपदस्यापि तादृशत्वेन नानार्थत्वापत्तेः । तत्र हि 'यन्न दुःखेन सम्भिन्नं न च ग्रस्तमनन्तरम्' इत्यभियुक्तोक्त्या स्वसामानाधिकरण्य-स्वाव्यवहितोत्तरवृत्तित्व-स्वावच्छेदक-शरीरावच्छिन्नत्त्व एतत्त्रितयसम्बन्धेन दुःखविशिष्टान्यत्वपर्यवसितदुःखासम्भेदविशिष्टसुखत्वस्य स्वर्गपदशक्यतावच्छेदकत्वं, वत्सकर्तृकदुग्धपानकर्मत्वरूपधानकर्मत्वविशिष्टगोत्वस्य धेनुपदशक्यतावच्छेदकत्वं च स्वीकृतम् । एवं चोक्तरीत्या विशेषणविशेष्यभावे विनिगमनाविरहेण विपरीतधर्मस्यापि तथात्वापत्त्या नानाशक्तिमत्त्वमेव नानार्थत्वमित्यवश्यमुपेयम् । तथा च तत्तद्रूपावच्छिन्नायाः स्वर्गधेन्वादिपदजन्यबोध-विषयतात्वावच्छिन्नप्रकारतानिरूपितभगवत्सङ्केतीयविशेष्यतारूपायाः शक्तेरेकत्वान्न नानाशक्तिमत्त्वरूपनानार्थत्वापत्तिः।

एवं प्रकृतेऽपि दर्शितरूपावच्छिन्नायाः काव्यपदजन्यबोधविषयतात्वा-वच्छिन्नप्रकारतानिरूपितविशेष्यतारूपायाः शक्तेरेकत्वात् न नानार्थत्वापत्तिः।

न च निरुक्तरूपस्य जात्यखण्डोपाध्यतिरिक्तत्वेन स्वरूपतोवच्छेद-कत्वासम्भवात् दोषविरहविशिष्टगुणविशिष्टालङ्कारत्वेनैव शक्यतावच्छेदकत्वं वक्तव्यम् । तथा च विशेषणविशेष्यभावे विनिगमनाविरहेण दोषविरह-

विशिष्टालङ्कारविशिष्टगुणत्वादेरपि तत्त्वापत्त्या अवच्छेदकतावच्छेदक-भेदादवच्छेदकताभेदः, तद्भेदे च दर्शितविशेष्यतारूपशक्तिभेद आवश्यक इति काव्यपदस्य नानार्थत्वापत्तिः अशक्यपरिहारैवेति वाच्यम्। दोषविरहगुणालङ्कारेषु त्रिषु व्यासज्यवृत्तेः एकस्या एव शक्यतावच्छेदकतायाः स्वीकारेण शक्तिभेदाप्रसङ्गात्। स्वर्गधेन्वादिपदस्य पुष्पवन्तादिपदस्य चोक्तयुक्त्या नानार्थत्वापत्तिपरिहाराय दर्शितगतेरेवादरणीयत्वात्। अस्या एव गतेः गदाधराद्यैः शक्तिवादतद्व्याख्यानादौ स्पष्टमभिहितत्वाच्च। एवञ्च शब्दार्थयोरेकशक्ति-स्वीकारादेव 'तददोषौ शब्दार्थौ सगुणावनलङ्कृती पुनः क्वापि' इति काव्यप्रकाशकारिकायां प्रक्रान्तकाव्यपरामर्शकतत्पदोत्तरमेकवचनं साधु सङ्गच्छते।

यथा च 'जात्याकृतिव्यक्तयः पदार्थ' इति न्यायसूत्रस्थपदार्थपदोत्तर-मेकवचनम्। तत्र हि न्यायसूत्रे जात्याकृतिव्यक्तिषु तिसृष्वप्येकशक्तिलाभायेति प्राचीनैः जातिव्यक्त्योर्द्वयोरेकशक्तिलाभायेति नवीनैश्च पदार्थपदोत्तरमेकवचनं समर्थितम्। तथा च न्यायसूत्रवृत्तौ विश्वनाथपञ्चाननः—'पदार्थ इत्येकवचनं तु तिसृष्वप्येकैव शक्तिरिति सूचनाय। विभिन्नशक्तौ कदाचित्कस्यचिदुपस्थितिस्स्यात्। शक्तेस्तुल्यत्वेऽपि व्यक्तेर्विशेष्यत्वात् प्राधान्यम्। तथैव शक्तिग्रहात्। न चाकृत्यादिसाधारणशक्यतावच्छेदकाभा[वा]त् न शक्त्यैक्यमिति वाच्यम्। तथा नियमे मानाभावात्। इदं गवादिपदमभिप्रेत्य[।]? तेन पश्वादिपदस्य जात्यवाचकत्वेऽपि न क्षतिः। जातिपदं वा धर्मपदं। तथैव लक्षणस्य वक्ष्यमाणत्वात्' इति। व्युत्पत्तिवादे गदाधरश्च—'एवं जात्याकृतिव्यक्तयः पदार्थः इत्यत्र त्रितयनिष्ठस्य पदशक्तिरूपपदार्थत्वस्य एकत्वं विवक्षितमिति तत्र विशेष्यपदस्य बहुवचनान्तत्वेऽपि विशेषणपदस्यैकवचनान्ततोपपत्तिः' इति।

एवं प्रकृतेऽपि काव्यपदशक्यपरत्वात् तत्पदस्य काव्यपदशक्तिरूप-काव्यपदार्थत्वे एकत्वस्य विवक्षितत्वात्, शब्दार्थाविति विशेष्यपदस्य द्विचनान्तत्वेऽपि तदितिविशेषणपदस्यैकवचनान्ततोपपत्तिः। विशेष्यवाचकपदोत्तर-विभक्तितात्पर्यविषयसंख्याविरुद्धसंख्याया अविवक्षितत्वं यत्र तत्रैव विशेष्यविशेषणपदयोः समानवचनकत्वमिति व्युत्पत्तिवादोक्तनियमादिति।

एतेन 'यत्तु प्राञ्चः अदोषौ सगुणौ सालङ्कारौ शब्दार्थौ काव्यमित्याहुः, तत्र विचार्यते। शब्दार्थयुगलं न काव्यशब्दवाच्यम्। मानाभावात्। 'काव्यमुच्चैः

पठ्यते, काव्यादर्थोऽवगम्यते, काव्यं श्रुतम् अर्थो न ज्ञातः इत्यादि विश्वजनीनव्यवहारतः प्रत्युत शब्दविशेषस्यैव काव्यपदार्थत्वप्रतिपत्तेश्च । व्यवहारः शब्दमात्रे लक्षणयोपपादनीय इति चेत्, स्यादप्येवं यदि काव्यपदार्थतया पराभिमते शब्दार्थयुगले काव्यशब्दशक्तेः प्रमापकं दृढतरं किमपि प्रमाणं स्यात् । तदेव तु न पश्यामः । विमतवाक्यं त्वश्रद्धेयमेव । इत्थं चासति काव्यशब्दस्य शब्दार्थयुगल-शक्तिग्राहके प्रमाणे प्रागुक्ताद्व्यवहारतः शब्दविशेषे सिद्ध्यन्तीं शक्तिं को नाम वारयितुमीष्टे इति' रसगङ्गाधरे जगन्नाथपण्डितरायोक्तं प्रत्युक्तम् । काव्यं श्रुतमित्यादिव्यवहारस्येव काव्यं बुद्धमित्यादिविश्वजनीनव्यवहारस्यैव शब्दार्थ-युगलस्य काव्यपदवाच्यत्वे प्रमाणत्वात् । कविप्रौढोक्तिकल्पितत्वस्यार्थ एव सत्त्वेन शब्दचित्रादप्यर्थचित्रस्यैवाभ्यर्हितत्वेन च शब्दार्थयुगलस्यैव काव्यपदवाच्यत्व-प्रतिपत्तेश्च । भवदुक्तव्यवहारसामान्यस्य लक्षणं विनापि निर्वाहसम्भवाच्च । काव्यपदार्थतयाऽस्मदभिमते शब्दार्थयुगले काव्यपदशक्तेः प्रमापकस्य काव्यं बुद्धमित्यादिव्यवहारस्यैव दृढतरप्रमाणत्वाच्च ।

वयं त्वेवं ब्रूमः । शब्दविशेषमात्रं न काव्यशब्दवाच्यम् । मानाभावात् । बुद्धं काव्यमिति विश्वजनीनव्यवहारतः । प्रत्युत शब्दार्थयोरेव काव्यपदार्थत्वप्रतिपत्तेश्च । व्यवहारश्चार्थे लक्षणयोपपादनीय इति चेत्—स्यादप्येवम्; यदि काव्यपदार्थतया पराभिमते शब्दविशेषमात्रे काव्यशब्दशक्तेः प्रमापकं दृढतरं किमपि प्रमाणं स्यात् । तदेव तु न पश्यामः। विमतवाक्यं त्वश्रद्धेयमेव। इत्थं चासति काव्यपदस्य शब्दविशेषमात्रशक्तिग्राहके प्रमाणे प्रागुक्ताद् व्यवहारतः शब्दार्थयुगले सिद्ध्यन्तीं शक्तिं को नाम वारयितुमीष्टे इति ।

यत्तु तत्रैव—'एतेन विनिगमनाभावादुभयत्रैव शक्तिरिति प्रत्युक्तं' इत्युक्तं तदेतेन प्रत्युक्तम् । व्यवहारस्योभयत्रापि तुल्यत्वात् । शब्दविशेषमात्रे शक्तिरित्यत्र विनिगमकस्य दौर्लभ्यात् ।

यदपि 'तदेवं शब्दविशेषस्यैव काव्यपदार्थत्वे सिद्धे तस्यैव लक्षणं वक्तुं युक्तम्, न तु स्वकपोलकल्पितस्य काव्यपदार्थस्य। एषैव च वेदपुराणादि-लक्षणेष्वपि गतिः। अन्यथा तत्रापीयं दुरवस्था स्यात्' इति तत्रैवोक्तं तदपि न मनोरमम् । अस्माभिरपि 'तदेवं शब्दार्थयुगलस्यैव काव्यपदार्थत्वे सिद्धे तस्यैव लक्षणं वक्तुं युक्तम् । न तु स्वकपोलकल्पितस्य काव्यपदार्थस्य इति वैपरीत्यस्य वक्तुं शक्यत्वात् । वेदो ज्ञात इत्यादिव्यवहारनिर्वाहाय शब्दार्थोभयस्यैव

वेदपदार्थत्वस्वीकारावश्यकताया दर्शितत्वात्। शब्दविशेषस्य वेदादिपदार्थत्व-स्वीकारे तस्यैव काव्यपदार्थत्वं स्वीकरणीयमित्यत्र राजाज्ञादिविरहाच्च। यदपि 'यत्तु आस्वादोद्बोधकत्वमेव काव्यत्वप्रयोजकम्। तच्च शब्दे चार्थे चाविशिष्टमित्याहुः, तन्न। रागस्यापि रसव्यञ्जकतायाः ध्वनिकारादिसकलालङ्कारिकसम्मतत्वेन प्रकृते लक्षणीयत्वापत्तेः। किं बहुना, नाट्याङ्गानां सर्वेषामपि प्रायशः तथात्वेन तत्त्वापत्तिर्दुर्वारैव' इति तदनन्तरग्रन्थे तेनैवोक्तं तदपि न यौक्तिकम्। आस्वादो हि चमत्कारः। स च सहृदयहृदयानन्दः। तदुक्तं जगदीशतर्कालङ्कारैः शब्दशक्तिप्रकाशे—'मानोरथिकसुखप्रभेदपर्यवसितं चमत्कारं प्रत्यपि शाब्दस्येव मानसस्यापि बोधस्य हेतुत्वात्' इति। तदुद्बोधकत्वं च तदभिव्यञ्जकत्वम्। तस्य रागसाधारण्येपि रागाभिव्यङ्ग्यचमत्कारात् विजातीयस्यैव काव्यजन्यचमत्कारस्य अनुभवसिद्धत्वेन दुरपह्नतया तादृशवैजात्यावच्छिन्नचमत्काराभिव्यञ्जकत्वस्य शब्दार्थमात्रवृत्तित्वेन रागे तदभावाल्लक्षणीयत्वानापत्तेः। तथा नाट्याङ्गानामपि सर्वेषां तदभावात्तत्त्वानापत्तेश्च। एवञ्च दर्शितवैजात्यावच्छिन्नचमत्काराभिव्यञ्जकत्व-रूपास्वादोद्बोधकत्वस्य काव्यत्वप्रयोजकत्वे बाधकाभावात्, तस्य च शब्दे चार्थे चाविशिष्टत्वात्, तदुभयस्य काव्यपदार्थत्वे न कापि क्षतिः।

यदपि तत्र 'एतेन रसोद्बोधसमर्थस्यैवात्र लक्ष्यत्वम् इत्यपि परास्तम्' इत्युक्तं तदप्येतेन परास्तम्। दर्शितरीत्या विजातीयचमत्काराभिव्यक्त्यनुकूलत्वरूपरसोद्बोध-समर्थत्वविशिष्टस्य लक्ष्यत्वे क्षतिविरहात्।

यदपि तत्रैव समनन्तरग्रन्थे—'अपि च काव्यपदप्रवृत्तिनिमित्तं शब्दार्थयोर्व्यासक्तं, प्रत्येकपर्याप्तं वा। नाद्यः। 'एको न द्वौ' इति व्यवहारस्येव 'श्लोकवाक्यं न काव्यम्' इति व्यवहारस्यापत्तेः। तस्माद्वेदशास्त्रपुराणलक्षणस्येव काव्यलक्षणस्यापि शब्दनिष्ठतैवोचिता इत्युक्तं तदप्यलग्नकमेव। दोषशून्यत्वे सति गुणालङ्कारवत्त्वमात्रस्य काव्यपदप्रवृत्तिनिमित्तत्वस्य दर्शितत्वेन तस्याव्यासज्यवृत्तित्वेन 'एको न द्वौ' इति व्यवहारस्येव 'श्लोकवाक्यं न काव्यम्' इति व्यवहारस्यानापत्तेः। विनिगमकाभावेन एकस्मिन् पद्ये उभयवैचित्र्ये काव्यद्वयव्यवहारे बाधकाभावात्। तदसहनेऽपि चमत्काराधिक्यमेकत्रैव स्वीकृत्यैकधा व्यवहारस्य सूपपादत्वात्। तत्र विजातीयैकचमत्कृतिजनकत्वेन एकत्वस्यैव व्यवहाराच्च। तदुक्तं काव्यप्रदीपप्रभायां वैद्यनाथेन 'उभयवैचित्र्ये

काव्यद्वयमिति व्यवहारस्स्यादिति चेत्—न। विजातीयैकचमत्कृति-जनकत्वेनैकत्वस्यैव व्यवहारात्' इति। वेदशास्त्रपुराणादिलक्षणस्य शब्दनिष्ठत्वौचित्येऽपि दर्शितयुक्त्या काव्यलक्षणस्य शब्दार्थनिष्ठत्वमेवोचितमित्य-सकृदुक्तमेव। अत्र च रसास्वादप्रतिबन्दीकत्वादिना दोषाणां काव्यशोभासम्पादकत्वादिना गुणानां काव्योत्कर्षाधायकत्वादिना चालङ्काराणामनुगतीकृत्य शक्यतावच्छेदकशरीरे निवेशाच्च न अ[न]नुगमः।

एतेन 'गुणत्वालङ्कारत्वयोरननुगमाच्च' इति रसगङ्गाधरोक्तदूषण-मनवकाशमेव। इदं पुनरिहावधेयम्। दोषगुणालङ्काराणां सर्वेषामपि लोकोत्तराह्लादरूपचमत्कारजनकतावच्छेदकत्वेनानुगतीकृतानां शक्यतावच्छेदक-शरीरेऽन्तर्भावः। काव्यप्रकाशकारिकाया अप्युक्तानुगतरूपेणैव तेषां निवेशे तात्पर्यम्। न तु दर्शितैकैकरूपेण। तथा निवेशे त[त्त]त्तात्पर्यकल्पने गौरवात्, प्रयोजनाभावाच्च। दर्शितानुगतैकरूपेण त्रयाणामपि निवेशे महालाघवस्य सम्भवेन तत्त्यागे बीजाभावाच्च। लोकोत्तरत्वं चाह्लादे सकलसहृदयसंविदेकगोचरो जातिविशेषः। चमत्कारत्वापरपर्यायः।

न च दोषविरहगुणालङ्कारजन्यानां चमत्काराणां मिथो विलक्षणत्वेन चमत्कारत्वजातेः त्रितयजन्यतावच्छेदकत्वासम्भवेन चमत्कारत्वावच्छिन्नजन्यता-निरूपितजनकतावच्छेदकत्वेन अनुगमो न सम्भवदुक्तिकः। चमत्कारनिष्ठजन्यता-निरूपितजनकतावच्छेदकत्वं च अतिप्रसक्तमिति वाच्यम्। सहृद्रयानुभवानुरोधेन तत्तज्जन्यतावच्छेदकवैजात्यानि स्वीकृत्य चमत्कारत्व-व्याप्यत्वेन तान्यनुगमय्य चमत्कारत्वव्याप्यजात्यवच्छिन्नजन्यतानिरूपितजनकत्वीयविषयितासम्बन्धावच्छिन्ना-वच्छेदकत्वेन निवेशे क्षत्यभावात्।

एवञ्च 'चमत्कारजनकतावच्छेदकधर्मस्वरूपकाव्यत्वग्रहं विना चमत्कार-जनकताग्रहोऽशक्यः। तज्जनकताग्रहं विना तद्घटितकाव्यत्वग्रहोऽपि तथा इति परस्पराश्रयः। न च विभावादिमत्त्वमेव चमत्कारजनकतावच्छेदकम् इति वाच्यम्। तथापि 'तानि चेन्नाट्यकाव्ययोः' इत्युक्तत्वात् विभावत्वग्रहात् काव्यत्वग्रहाधीनादेव जनकताग्रहः। जनकताग्रहे च तदवच्छेदकवत्त्वरूपकाव्यत्वग्रह इति द्व्यन्तरितचक्रकस्य दुर्वारत्वात् इति दूषणमलग्नकं वेदितव्यम्। विच्छित्तिविशेष-जीवातुगुणालङ्कारादिप्रभेदानामेव प्रातिस्विकरूपेण. जनकतावच्छेदकत्वात्।

दर्शितानुगतरूपेण च तेषामेव काव्यत्वरूपत्वाच्च। न हि प्रातिस्विकरूपानुगतरूपयोः परस्परसापेक्षग्राहकत्वमिति कुतोऽन्योन्याश्रयः चक्रकं चेति। एतेन 'लक्षणे गुणालङ्कारादिनिवेशोऽपि न युक्तः। 'उदितं मण्डलं विधोः' इत्यभिसारिकाविरहिण्यादिसमुदीरिते अभिसरणविधिनिषेधजीवनाभावादिपरे काव्ये 'गतोऽस्तमर्कः' इत्यादौ च अव्याप्त्यापत्तेः। न चेदमकाव्यमिति शक्यं वदितुम्। काव्यतया पराभिमतस्यापि तथा वक्तुं शक्यत्वात्। काव्यजीवितं चमत्कारित्वं चाविशिष्टमेव' इति जगन्नाथप्रदर्शितमपि दूषणमलब्धप्रसरमेव। दर्शितानुगतरूपाक्रान्तस्य रसस्य निष्पत्तौ समर्थस्य विभावस्य प्रतिपादकत्वेन निरलङ्कारादावपि काव्यत्वसिद्धेः निष्प्रत्यूहत्वात्।

यदपि 'दुष्टं काव्यम्' इति व्यवहारस्य बाधकं विना लाक्षणिकत्वायोगाच्च। न च 'संयोगाभाववान् वृक्षः संयोगी' इतिवत् अंशभेदेन दोषरहितं दुष्टमिति व्यवहारे बाधकं नास्ति इति वाच्यम्। 'मूले महीरुहो विहङ्गमसंयोगी, न शाखायाम्' इति प्रतीतेरिव इदं पद्यं पूर्वार्धे काव्यमुत्तरार्धे तु न काव्यम् इति स्वरसवाहिनो विश्वजनीनानुभवस्य विरहात्, अव्याप्यवृत्तितायाः अपि तस्यायोगात्। शौर्यादिवदात्मधर्माणां गुणानां, हारादिवदुपस्कारकाणामलङ्काराणां च शरीरघटकत्वानुपपत्तेश्च' इति रसगङ्गाधरोक्तं तदपि दर्शितपरिष्कारेण पराहतम्। तत्र ताद्रूप्येण दोषादीनाम् अनन्तर्भावात्, 'दुष्टं काव्यम्' इति व्यवहारे काव्यपदस्य विजातीयचमत्कृतिजनकतावच्छेदकगुणादिरूपयत्किञ्चिद्धर्मावच्छिन्नपरतया तद्धर्मावच्छिन्ने दोषविशेषावगाहितादृशव्यवहारस्य सूपपादत्वात्, दोषतदभावानाम् अव्याप्यवृत्तित्वस्वीकारस्य अनावश्यकत्वात्। आत्मनिष्ठस्यापि सुखशौर्यादेः 'शरीरे सुखं, शूरोऽयम् आकार' इत्यादि सार्वजनीनव्यवहारात् अवच्छेदकत्व-व्यञ्जकत्वादिपरम्परासम्बन्धेन शरीरादिनिष्ठत्ववत् 'मधुरो वर्णो' 'मधुरोऽर्थ' इति विश्वजनीनव्यवहारात् रसनिष्ठस्यापि माधुर्यादिगुणस्य व्यञ्जकतासम्बन्धेन शब्दार्थनिष्ठत्वस्वीकारात्। हारनूपुरादेरिव अनुप्रासोपमाद्यलङ्कारस्य साक्षात्सम्बन्धेन शब्दार्थरूपशरीरवृत्तित्वे कस्यापि बाधकस्यानुपलम्भात्। एतत्तत्वमग्रे स्फुटीभविष्यति। दोषशून्यत्वे सति गुणालङ्कारवत्त्वं चमत्कारत्वव्याप्य-जातिविशेषावच्छिन्नजन्यतानिरूपितजनकतावच्छेदकधर्मवत्वपर्यवसितमेव काव्यलक्षणमपि। काव्यप्रकाशकारादिभिस्तस्यैव लक्षणत्वेनोक्तत्वात्।

न च लक्षणलक्ष्यतावच्छेदकयोरैक्यात् अव्यावर्तकतेति वाच्यम्। काव्यपदवाच्यत्वस्यैव शब्दार्थोभयसाधारणस्य लक्ष्यतावच्छेदकत्वे क्षत्यभावात्। एतेन 'लक्ष्यतावच्छेदकं चैतत्समानाधिकरणं काव्येत्याद्यनुगतव्यवहारेणा-स्वादजनकतया च सिद्धजातिविशेषरूपमुपाधिरूपं वा काव्यत्वं बोध्यम्' इति रसगङ्गाधरमर्मप्रकाशे शब्देन्दुशेखरादिकृता नागोजिभट्टेनोक्तं प्रत्युक्तम्। काव्यत्वस्य जातित्वे साङ्कर्यस्य दर्शितत्वेन तस्य तत्त्वासम्भवात्। उपाधिरूपे मानाभावात्। तस्य शब्दार्थोभयसाधारण्याभावाच्च।

न च साङ्कर्यस्य जातिबाधकत्वे मानाभावात्, परस्परासामानाधिकरण्येन सिध्यतोरेव जात्यो: बाधकत्वाङ्गीकाराच्च, कालिदासप्रभवतावच्छेदकवैजात्यादिना कत्वादिना वा साङ्कर्यं न काव्यत्वस्य जातित्वं प्रतिबध्नाति। तदुक्तं मञ्जूषायां साधुत्वस्य जातित्वं व्यवस्थापयता नागोजिभट्टेनैव। 'ननु साधुत्वस्य जातित्वे कत्वादिना सङ्कर इति चेत् न। ययोर्जात्यो: परस्परासामानाधिकरण्येनैव सिद्धि: परस्परमाश्रयभेदकता च लोकसिद्धा तयोस्साङ्कर्यस्यैव दोषत्वात्। आश्रययोर्भेदभङ्ग एव हि साङ्कर्यदूषकताबीजम्। तादृशजात्यो: यत्र साङ्कर्यप्रसङ्ग: तत्रोभयवैलक्षण्यं स्वीकार्यम्। यथा नृसिंहेऽश्वतरे वा। ययोस्तु सामानाधिकरण्येन सिद्धि:, तयोस्साङ्कर्यस्य व्याप्यव्यापकभावापन्नजात्योस्साङ्कर्यस्येव अदोषत्वात्। एवञ्च साङ्कर्यमुपाध्योरपि दोषाय यदि तत्रापि आश्रयभेदभङ्गप्रसङ्ग इति स्पष्टं श्रीहर्षकृतखण्डने। न तु साङ्कर्यस्य सर्वथा जात्यभावकल्पकत्वं' मानाभावात्। एवञ्च भूतत्वमूर्तत्वे पृथिवीत्वशरीरत्वे च जातिरूपे एव। क्रियासमवायि-कारणतावच्छेदकतया मूर्तत्वादेरिव भूतादिपदशक्यतावच्छेदकतया भूतत्वादेरपि जातित्वात्। न हि कारणतावच्छेदकतयैव जातिसिद्धिः न शक्यतावच्छेदकतया इति राजाज्ञास्तीति धिक्' इति। तथा च काव्यत्वजाते: तादृशवैजात्यकत्वादि-सामानाधिकरण्येन सिद्धौ न काचिदनुपपत्तिरिति वाच्यम्। स्वसामानाधिकरण्य-स्वाभावसामानाधिकरण्य-उभयसम्बन्धेन जातिविशिष्टजातित्वावच्छेदेन स्वसमानाधिकरणात्यन्ताभावप्रतियोगित्वाभावनियमभङ्गप्रसङ्गस्यैव मानत्वात्। तस्य च सर्वत्र निरङ्कुशप्रसरत्वात्। जातिबाधकेषु साङ्कर्यस्याविशेषेण परिगणितत्वाच्च! तदुक्तं वैशेषिकसूत्रप्रशस्तपादभाष्यव्याख्यायां किरणावल्यामुदयनाचार्यै: - 'द्रव्यत्वमेव नास्ति गोत्वादिवदनुपलब्धेरिति चेत् - न।

कार्याश्रयतोपलक्षणेन साधर्म्येणाभिव्यक्तस्य सामान्यस्य सास्नादि-संस्थानाभिव्यक्तगोत्वादिवत्प्रतीतेः। अन्यथा कार्याश्रयत्वमपि सामान्यानियतं नवस्वेव न स्यात्। कारणत्वं हि सामान्येन नियम्यते। कार्यत्वञ्च। तच्च स्वाभाविकमवादीनाद्बाधनाच्चौपाधिकमिति विशेषः। 'व्यक्तेरभेदस्तुल्यत्वं सङ्करोथानवस्थितिः। रूपहानिरसम्बन्धो जातिबाधकसङ्ग्रहः' इति। अत्र किरणावलीप्रकाशे वर्धमानोपाध्यायाः, 'जातौ बाधकमेव किम् इत्याह—व्यक्तेरभेद इति। अभिन्नव्यक्तिका, अन्यजात्या सह अन्यूनानतिरिक्तव्यक्तिका च। परस्परात्यन्ताभावसमानाधिकरणत्वे सति परस्परसमानाधिकरणा, अनवस्थादिपराहता च जातिर्न भवति इत्यर्थः। तथा हि। आकाशत्वं न जातिः, एक व्यक्तिमात्रवृत्तित्वात्। एतद्घटत्ववत्। अन्यथा जातिलक्षणव्याघातात्। बुद्धित्वं ज्ञानपदप्रवृत्तिनिमित्तं न ज्ञानत्वभिन्नजातिः, ज्ञानभिन्नावृत्तित्वे सति सकलज्ञानवृत्तित्वात् विषयित्ववत्। निष्क्रमणत्वप्रवेशनत्वे न जाती, परस्परात्यन्ताभावसमानाधिकरणत्वे सति परस्परसमानाधिकरणत्वात्, भूतत्व-मूर्तत्ववत्। सामान्यं यदि द्रव्यकर्मभिन्नं सत् जातिमत्स्यात्, गुणस्स्यात् इति, सामान्यरूपाव्यवस्थैवानवस्था। विशेषो यदि द्रव्यकर्मान्यत्वे सति जातिमान् स्यात् गुणस्स्यात्। तथा च व्यावृत्तधीहेतुः न स्यात्। समवायो यदि प्राप्तित्वे सति समवायवान्स्यात् संयोगस्स्यात्, न च प्राप्तित्वात् समवायवत्वं साध्यं साधनावच्छिन्नसाध्यव्यापकस्य संयोगत्वस्य उपाधित्वात् इति परमते समवायनानात्वमभ्युपेत्योक्तम्। अस्माकं व्यक्तेरभेद एव तत्रापि बाधक इति क्रमेणापादनम् इति भावः' इति।

किञ्च किरणावल्यां 'पृथिव्यादीनां पञ्चानामपि भूतत्वेन्द्रियप्रकृतित्व-बाह्यैकैकेन्द्रियग्राह्यविशेषगुणवत्त्वानि' इति प्रशस्तपादभाष्यव्याख्यानावसरे कण्ठरवेणोदयनाचार्यैः भूतत्वमूर्तत्वयोः साङ्कर्यात् जातित्वं न सम्भवति इत्युक्तम्। यथा 'पृथिव्यादीनामिति। भूतत्वमौपाधिकं सामान्यम्। अथ जातिरेव किं न स्यात्। न स्यात्। व्यञ्जकनियमाभावेन व्यक्तिनियमानुपपत्तेः। बहिरिन्द्रियग्राह्य-विशेषगुणवत्तैव व्यञ्जिका इति चेत् न। तदा मूर्तत्वमपि जातिरेव स्यात्। अवच्छिन्नपरिमाणस्य व्यञ्जकस्य सद्भावात्। एवमस्तु; को दोष इति चेत् न। जातिसङ्करप्रसङ्गात्। तथा हि मनसि मूर्तत्वं, नभसि भूतत्वं, मिथः परिहारेण वर्तमानं

पृथिव्यादौ सङ्कीर्यते। अस्तु तर्हि पृथिवीत्वाद्यनेकनिबन्धनप्रवृत्तिरेव भूतशब्दः, अक्षादिवत् इति चेत् न। एकनिमित्तत्वे सम्भवत्यनेकार्थत्वकल्पनानवकाशात्। तस्माद्धोक्तव्यविषयाश्रयतया भूतानि = सिद्धानि भूतानीत्युच्यन्ते' इति। उक्तञ्च मुक्तावलीव्याख्यायां मञ्जूषाख्यायां पट्टाभिरामसूरिभिरपि। 'सङ्करश्च स्वसामानाधिकरण्यस्वाभावसामानाधिकरण्य स्वसमानाधिकरणात्यन्ताभावप्रतियोगित्व एतत्रितयसम्बन्धेन जातिविशिष्टत्वम्। तद्ज्ञानस्य च तदभावव्याप्यवत्ताज्ञानमुद्रया जातित्वग्रहप्रतिबन्धकत्वम्। तस्य च जातित्वाभावव्याप्यत्वे ब्रह्मक्षत्रादीनां एकतरबीजेन अपरक्षेत्रे उत्पादितस्य शरीरस्य ब्रह्मत्वक्षत्रियत्वाद्यत्मकजातिद्वयनिरासनपरस्मृतिपुराणान्येव प्रमाणं, अन्यथा तत्र जातिद्वयस्वीकारसम्भवेन तद्विरुद्धसूतत्वादिजात्यन्तरवैफल्यात्। एतच्च क्वचिद्विनिगमनाविरहाद् द्वयोर्जातित्वे बाधकम्। यथा भूतत्वमूर्तत्वयोः। क्वचित् अन्यतरस्य प्रबलप्रमाणेन जातित्वे निर्णीते इतरस्यैव जातित्वं बाधते। यथा गन्धसमवायिकारणतावच्छेदकतया प्रत्यक्षप्रमाणेन च पृथिवीत्वस्य जातित्वे निर्णीते तेन सह संकरात् इन्द्रियत्वं न जातिः' इति।

इदमत्रालोचनीयम्। परस्पराभावसमानाधिकरणानां धर्माणां तावत् केषाञ्चित्साङ्कर्यं केषाञ्चिदसाङ्कर्यञ्च दृश्यते। तत्र साङ्कर्ये किञ्चिदवच्छेदकमनुगतं वाच्यम्। तच्च न धर्मत्वमात्रम्। नापि परस्पराभावसमानाधिकरणधर्मत्वमात्रम्। उपाधावतिप्रसङ्गात्। किन्तु परस्पराभावसमानाधिकरणजातित्वमेव तदवच्छेदकम्। न च जात्योस्साङ्कर्यं क्वचित् दृष्टचरं येन तदपि नावच्छेदकं भवेत्। तेन साङ्कर्यं जातिमात्रस्यैव बाधकम् इति।

एवञ्च सकलग्रन्थकारैरपि साङ्कर्यस्य सर्वथा जात्यभावकल्पकत्वस्वीकारेण नागोजिभट्टोक्तविशेषो न श्रद्धेय एव। किञ्च भूतादिपदशक्यतावच्छेदकतया भूतत्वादेः जातित्वसाधनमपि नोपादेयम्। पूर्वोदाहृतबहुग्रन्थवैयाकुलीप्रसङ्गात्। शक्यतावच्छेदकतया जातिसिद्धेः प्रामाणिकानामसम्मतत्वाच्च। तथा चोक्तम् आत्मपदशक्यतावच्छेदकतया आत्मत्वजातिसिद्धिं वदतां मतनिराकरणावसरे शितिकण्ठदीक्षितैः, 'यद्यपि नित्यस्य स्वरूपयोग्यत्वे फलावश्यंभाव इति नियमेन सुखसमवायिकारणतावच्छेदकतया सिद्धस्य आत्मत्वस्य ईश्वरे स्वीकारे सुखोत्पत्त्यापत्तेः, तादृशनियमाभावेपि अत्यन्ताजनकव्यावृत्तरूपेणैव कारणताया

न्याय्यत्वात्, ईश्वरे आत्मत्वजातिसत्त्वे प्रमाणाभावः, तथापि आत्मपदशक्यतावच्छेदकतया आत्मत्वजातिः तत्साधारणी सिद्ध्यति। कार्यतावच्छेदकतया कारणतावच्छेदकतया जातिसिद्धिवत् असति बाधके शक्यतावच्छेदकतयापि जातिसिद्धेः अदुष्टत्वात्। असतिबाधक इति विशेषणाच्च न अभावपदशक्यतावच्छेदकतयाऽभावत्वादिजातिसिद्धिः। जन्यभावत्वावच्छिन्न-कारणतानिरूपितकार्यतावच्छेदकतया ध्वंसत्वादेरपि जातित्वापत्त्या तद्विशेषणस्य भवतोऽप्यावश्यकत्वात् इति आहुः। तच्चिन्त्यम्। तथा सति विभुपदशक्यता-वच्छेदकतया विभुत्वमपि जातिः सिद्ध्येत्। न चेष्टापत्तिः। एवं विधानन्तजाति-कल्पने प्रमाणाभावादिति कार्यतावच्छेदकतया कारणतावच्छेदकतया च जातिसिद्धिरित्येवाङ्गीकरणीयम्। एवञ्च सुखसमवायिकारणतावच्छेदकात्मत्वजातेः ईश्वरसाधारण्ये मानाभाव एव। वस्तुतस्तु न हि शक्यतावच्छेदकतया जातिसिद्धिरिति ब्रूमः। येन उक्तानुपपत्तिरुद्भाव्येत। अपि तु सुखसमवायिकारणता-वच्छेदकत्वेन जीवात्मनि सिद्धस्यात्मत्वस्य श्रौतात्मव्यवहारबलेन तत्सम्बन्धमात्रमीश्वरे कल्प्यते इति। इदमत्र बोध्यम्। पदप्रवृत्तिनिमित्तत्वेन क्वापि जातिर्न कल्पयितुं शक्यते। अक्षादिपदेष्वेकजाति-कल्पनापत्तेः। नानाजातीनां प्रवृत्तिनिमित्तत्वकल्पनामपेक्ष्य एकजातिकल्पनाया एव लघुत्वात्। तस्माज्जातेरुपाधेर्वा प्रमाणान्तरसिद्धस्यैव वृद्धव्यवहारे निमित्तत्वाश्रयणमेव युक्ततरं'' इति।

इदञ्च काव्यपदशक्यतावच्छेदकतया काव्यत्वजातिसाधनमतेऽपि समानं दूषणं इत्यनुसन्धेयम्। तथा च प्रकाशकाराभिमतमेव लक्षणं लक्ष्यतावच्छेदकं च शब्दार्थसाधारणं सामञ्जस्यमावहति।

उक्तं च ध्वन्यालोकेऽप्यानन्दवर्धनाचार्यैः ध्वन्यभाववादिनां प्रथमद्वितीय-विकल्पोद्भावनावसरे 'शब्दार्थशरीरं तावत् काव्यम्। तस्य (तत्र) शब्दगताः चारुत्वहेतवोऽनुप्रासादयः प्रसिद्धा एव। अर्थगताश्चोपमादय' इति। "सहृदयहृदयाह्लादिशब्दार्थमयत्वमेव काव्यलक्षणम्'' इति च। लोचने च श्रीमदभिनवगुप्तपादैश्च 'शब्दार्थगुणालङ्काराणामेव शब्दार्थशोभाकारित्वात् लोकशास्त्रातिरिक्तसुन्दरशब्दार्थमयस्य काव्यस्य अनन्यशोभाहेतुः कश्चिदन्योऽस्ति योऽस्माभिः न गणितः' इति। तैरेवान्यत्रापि 'गुणालङ्कारौचित्य-

सुन्दरशब्दार्थशरीरस्य सति ध्वननात्मन्यात्मनि काव्यरूपताव्यवहारः' इति च। इत्थमेव चोक्तमलङ्कारसर्वस्वविमर्शिन्यां राजानकजयरथेन। इह यद्वदात्मनो व्यापकत्वात् शरीरे घटादौ च वर्तमानत्वेऽपि करणादिविशिष्टे शरीर एव जीवव्यवहारः न घटादौ, तद्वदस्यापि विविधगुणालङ्कारौचित्यचारुशब्दार्थ-शरीरगतत्वेनैव आत्मत्वव्यवहारो नान्यत्रेति न कश्चिद्दोष' इति। उक्तञ्च वामनेनापि सू: ''काव्यं ग्राह्यमलङ्कारात्''। वृत्तिः। ''काव्यं खलु ग्राह्यं उपादेयं भवति, अलङ्कारात्। काव्यशब्दोऽयं गुणालङ्कारसंस्कृतयोः शब्दार्थयोर्वर्तते। शक्त्या तु शब्दार्थमात्रवचनोऽत्र गृह्यते। कोसावलङ्कार इत्यत्र आह—सौन्दर्यमलङ्कारः। अलङ्कृतिरलङ्कारः। करणव्युत्पत्त्या पुनः अलङ्कारशब्दोऽयं उपमादिषु वर्तते। स दोषगुणालङ्कारहानादानाभ्याम्—स खल्वलङ्कारो दोषहानाद्गुणालङ्कारादानाच्च सम्पाद्यः कवेः'' इति। तथा च सरस्वतीकण्ठाभरणे भोजराजः 'अदोषं गुणवत्काव्यमलङ्कारैरलङ्कृतम्। रसान्वितं कविः कुर्वन् कीर्तिं प्रीतिं च विन्दति' इति। विद्यानाथश्च 'गुणालङ्कारसहितौ शब्दार्थौ दोषवर्जितौ। गद्यपद्योभयमयं काव्यं काव्यविदो विदुः' इति। तथा चालङ्कारशिरोमणिकारोऽपि—'शब्दार्थौ निर्दोषौ काव्यं सगुणावलङ्क्रियावन्तौ' इति। साहित्यकौमुद्याम् अर्कसूरिरपि—

'शब्दार्थौ दोषरहितौ गुणालङ्कारशालिनौ।
काव्यं प्रचक्षते प्राज्ञाः साहित्यमिति केचन॥' इति।

एवम् अन्यैश्च प्राचीनैः अर्वाचीनैश्च सकलालङ्कारकारैः समादृतं काव्यप्रकाशकारोक्तं काव्यलक्षणं लक्षीकृत्य प्रतिक्षिपति(न्ति) स्म केचिदर्वाचीनाः। तदुद्भावितदोषाणां प्रत्याख्यानपुरस्सरम्। प्रकाशलक्षणस्यैव स्थापनाय ममोद्यमः।

तत्र रसगङ्गाधरे जगन्नाथपण्डितराजोद्भावितदोषनिरासेनैव दर्पणकारादि-दर्शितदूषणानि प्रायः प्रत्याख्यातप्रायाणि। तथापि अवशिष्टानां केषाञ्चित् दोषाणां निराकरणाय प्रथमं तदुक्तदूषणप्रकारः प्रदर्श्यते। अयं च तद् ग्रन्थः। ''तत्किंरूपं तावत् काव्यमित्यपेक्षायां कश्चित्—'तददोषौ शब्दार्थौ सगुणावनलङ्कृती पुनः क्वापि' इति, तच्चिन्त्यम्। तथा हि यदि दोषरहतिस्यैव काव्यत्वाङ्गीकारः, तदा

'न्यक्कारो ह्ययमेव मे यदरयस्तत्राप्यसौ तापसः,
सोऽप्यत्रैव निहन्ति राक्षसकुलं जीवत्यहो रावणः।

धिक् धिक्च्छक्रजितं प्रबोधितवता किं कुम्भकर्णेन वा,
स्वर्गग्रामटिकाविलुण्ठनवृथोच्छूनैः किमेभिर्भुजैः ॥'

अस्य श्लोकस्य विधेयाविमर्शदोषदुष्टतया काव्यत्वं न स्यात्। प्रत्युत ध्वनित्वेन उत्तमकाव्यता अस्य अङ्गीकृता। तस्मादव्याप्तिः लक्षणदोषः। ननु कश्चिदेवांशोऽत्र दुष्टः न पुनस्सर्वोऽपीति चेत् तर्हि यत्रांशे दोषः सः अकाव्यत्वप्रयोजकः। यत्र ध्वनिः स उत्तमकाव्यत्वप्रयोजक इति अंशाभ्यां उभयत आकृष्यमाणं काव्यमकाव्यं वा किमपि न स्यात्। ननु (न च) कञ्चिदेवांशं काव्यस्य दूषयन्तः श्रुतिकट्वादयो दोषाः, किं तर्हि ? सर्वमेव काव्यम्। तथा हि काव्यात्मभूतस्य रसस्य अनपकर्षकत्वे तेषां दोषत्वमपि नाङ्गीक्रियते। अन्यथा नित्यदोषानित्यदोषत्वव्यवस्थापि न स्यात्। यदुक्तं ध्वनिकृता "श्रुतिदुष्टादयो दोषा अनित्या ये च दर्शिताः। ध्वन्यात्मन्येव शृङ्गारे ते हेया इत्युदाहृताः।" 'किञ्चैवं काव्यं प्रविरलविषयं निर्विषयं वा स्यात्। सर्वथा निर्दोषस्यैकान्तमसम्भवात्। नन्वीषदर्थे नञः प्रयोग इति चेत्—तर्हि ईषद्दोषौ शब्दार्थौ काव्यमित्युक्ते निर्दोषयोः काव्यत्वं न स्यात्। सति सम्भवे ईषद्दोषौ इति चेत्—एतदपि काव्यलक्षणेऽवाच्यम्। रत्नादिलक्षणे कीटानुवेधपरिहारवत्। न हि कीटानुवेधादयो रत्नस्य रत्नत्वं व्याहन्तुमीशते। किन्तु उपादेयतारतम्यमेव कर्तुम्। तद्वत् अत्र श्रुतिकट्वादयोऽपि काव्यस्य। उक्तञ्च 'कीटानुविद्धरत्नादिसाधारण्येन काव्यता। दुष्टेष्वपि मता यत्र रसाद्यनुगमस्स्फुटः'। किञ्च शब्दार्थयोस्सगुणत्वविशेषणमपि अनुपपन्नम्। गुणानां रसैकधर्मत्वस्य—'ये रसस्याङ्गिनो धर्माश्शौर्यादय इवात्मनः।' इत्यादिना तेनैव प्रतिपादितत्वात्। रसाभिव्यञ्जकत्वेन उपचारत उपपद्यते इति चेत् तथाप्ययुक्तम्। तथा हि। तयोः काव्यस्वरूपत्वेनाभिमतयोः शब्दार्थयोः रसोऽस्ति न वा। नास्ति चेत्—गुणवत्त्वमपि नास्ति। गुणानां तदन्वयव्यतिरेकानुविधायित्वात्। अस्ति चेत्—कथं नोक्तं रसवन्तौ इति विशेषणम्। गुणवत्त्वान्यथानुपपत्त्या एतल्लभ्यते इति चेत्, तर्हि सरसौ इत्येव वक्तुं युक्तम्, न सगुणौ इति। न हि प्राणिमन्तो देशा इति वक्तव्ये शौर्यादिमन्तो देशा इति केनाप्युच्यते। ननु शब्दार्थौ सगुणौ इत्यनेन गुणाभिव्यञ्जकौ शब्दार्थौ काव्ये प्रयोज्यौ इत्यभिप्रायः इति चेत्—न। गुणाभिव्यञ्जकशब्दार्थवत्त्वस्यापि काव्ये उत्कर्षमात्राधायकत्वम्। न तु स्वरूपाधायकत्वम्। उक्तं हि (काव्यस्य) शब्दार्थौ

शरीरम्। रसादिश्चात्मा। गुणाश्शौर्यादिवत्। दोषाः काणत्वादिवत्। रीतयः अवयवसन्धानविशेषवत्। अलङ्काराः कटकमुकुटादिवत् इति। एतेन 'अनलङ्कृती पुनः क्वापि' इति यदुक्तं, तदपि परास्तम्। अस्य ह्यर्थः न सर्वत्र सालङ्कारौ, क्वचित्त्वस्फुटालङ्कारौ अपि शब्दार्थौ काव्यमिति। तत्र सालङ्कारशब्दार्थयोः अपि काव्ये उत्कर्षमात्राधायकत्वम्। एतेन 'वक्रोक्तिः काव्यजीवितम्' इति वक्रोक्तिजीवित-कारोक्तिरपि परास्ता। वक्रोक्तेरलङ्काररूपत्वात्। यच्च क्वचिदस्फुटालङ्कारत्वे उदाहृतम्।

'यः कौमारहरः स एव हि वरः ता एव चैत्रक्षपाः
ते चोन्मीलितमालतीसुरभयः प्रौढाः कदम्बानिलाः।
सा चैवास्मि तथापि तत्र सुरतव्यापारलीलाविधौ-
रेवारोधसि वेतसीतरुतले चेतः समुत्कण्ठते॥' इति।

एतच्चिन्त्यम्। अत्र हि विभावनाविशेषोक्तिमूलस्य सन्देहसङ्करालङ्कारस्य स्फुटत्वम्। एतेन 'अदोषं गुणवत्काव्यमलङ्कारैरलङ्कृतम्। रसान्वितं कविः कुर्वन् कीर्तिं प्रीतिं च विन्दति' इत्यादीनामपि काव्यलक्षणत्वमपास्तम्।

यत्तु ध्वनिकारोक्तं 'काव्यस्यात्मा ध्वनिरि'ति, तत्किं वस्त्वलङ्काररसादि-लक्षणस्त्रिरूपो ध्वनिः काव्यस्यात्मा उत रसादिरूपमात्रो वा? नाद्यः। प्रहेलिकादावतिव्याप्तेः। द्वितीयश्चेत् ओमिति ब्रूमः।

ननु यदि रसादिरूपमात्र एव ध्वनिः काव्यस्यात्मा, तदा

अत्ता एत्थ णिमज्जइ एथ्थ अहं दिअसअं पलो एहि।
मा पहिअ रत्तिअंधिअ सज्जाए मह णिमज्जहसि॥

(छा) श्वश्रूरत्र निमज्जति अत्राहं दिवसकं प्रलोकय।
मा पथिक रात्र्यन्धशय्यायां मम निमङ्क्ष्यसि॥

इत्यादौ वस्तुमात्रव्यङ्ग्यत्वे कथं काव्यव्यवहार इति चेत्—अत्रापि रसाभासवत्तयैव इति ब्रूमः। अन्यथा 'देवदत्तो ग्रामं याति' इति वाक्ये तद्भृत्यस्य तदनुसरणरूपव्यङ्ग्यावगतेरपि काव्यत्वं स्यात्। अस्त्विति चेत्—न। रसवत एव काव्यत्वाङ्गीकारात्। काव्यस्य प्रयोजनं हि रसास्वादसुखपिण्डदानद्वारेण वेदशास्त्रविमुखानां सुकुमारमतीनां राजपुत्रप्रभृतीनां विनेयानां रामादिवत्प्रवर्तितव्यं

न रावणादिवत् इत्युपदेश इति चिरन्तनैरप्युक्तत्वात्। तथा चाग्नेयपुराणेप्युक्तम्—'वाग्वैदग्ध्यप्रधानेऽपि रस एवात्र जीवितं' इति। व्यक्तिविवेककारेणाप्युक्तं 'काव्यस्यात्मन्यङ्गिनि रसादिरूपे न कस्यचिद्विमतिः' इति। ध्वनिकारेणाप्युक्तम् 'न हि कवेः इतिवृत्तमात्रनिर्वहणेन आत्मलाभः। इतिहासादेरेव तत्सिद्धेः' इत्यादि। ननु तर्हि प्रबन्धान्तर्वर्तिनां केषामपि नीरसानां पद्यानां काव्यत्वं न स्यात् इति चेत्—न। रसवत्पद्यान्तर्गतनीरसपदानामिव पद्यरसे प्रबन्धरसेनैव तेषां रसवत्त्वाङ्गीकारात्। यत्तु नीरसेष्वपि गुणाभिव्यञ्जकवर्णसद्भावात् अलङ्कारसद्भावाच्च काव्यव्यवहारः स रसादिमत्काव्यबन्धसाम्यात् गौण एव'' इति।

अत्रोच्यते। अदोषावित्यनेन काव्यत्वव्याघातुकदोषसामान्यशून्यत्वमेव विवक्षितम्। ते च दोषाः प्रतिकूलवर्ण-श्रुति-कटु-कष्ट-च्युतसंस्कृति-क्लिष्ट-अभवन्मतयोगाः षडेव। अन्ये च काव्यापकर्षका एव। अविमृष्टविधेयांशस्य च काव्यत्वव्यघातुकत्वाभावेन न्यक्कारो ह्ययमेव इति प्रागुद्याहृतश्लोके नाव्याप्तिः।

ननु काव्यत्वव्याघातुकत्वेन तादृशदोषाणामभावस्य निवेशो न सम्भवति आत्माश्रयापत्तेः। नापि काव्यत्वव्याघातुका ये ये दोषाः तेषां तत्तद्व्यक्तित्वावच्छिन्नप्रतियोगिताकाभावकूटवत्वस्य, गौरवादननुगमाच्च इति चेत्—न। प्रथमनिर्दिष्टदोषत्रयस्य रसप्रतीतिप्रतिबन्धकत्वेन चरमनिर्दिष्टदोषत्रयस्य शाब्दबोधप्रतिबन्धकत्वेन च रसप्रतीतिशाब्दबोधान्यतरप्रतिबन्धकत्वेन द्विविधदोषाननुगमय्य तदवच्छेदकरूपावच्छिन्नप्रतियोगिताकाभाववत्त्वनिवेशे दर्शितदोषाप्रसङ्गात्।

ननु (न च) दोषहानस्यैवान्वयव्यतिरेकाभ्यां प्रतिबन्धकत्वेन दोषाणां तेन रूपेणानुगमो न सम्भवति। प्रतिबन्धकज्ञानविषयत्वेनानुगमे च समूहालम्बन-दोषज्ञानमादाय उदासीनपदार्थेषु अतिप्रसङ्गः। तादृशप्रतिबन्धकतावच्छेदक-विषय(यि)तानिरूपकतावच्छेदकरूपवत्त्वेनानुगमेऽपि घटाद्युदासीनपदार्थ-विषयकसमूहालम्बनात्मकरसप्रतीतिशाब्दबोधान्यतरमादाय तत्रातिप्रसङ्गो दुर्वार एवेति वाच्यम्। रसप्रतीतेरखण्डत्वेन विषयान्तरावगाहित्वासम्भवात्। रसत्वव्याप्यधर्मावच्छिन्नविषयकत्वावच्छिन्नप्रतिबध्यत्व—शाब्दबुद्धित्वावच्छिन्न-प्रतिबध्यत्व-अन्यतरप्रतिबध्यतानिरूपितप्रतिबन्धकताया विवक्षणे दोषाभा(वा)च्च।

न च च्युतसंस्कृत्यादिदोषाणां शाब्दबुद्धित्वावच्छिन्नं प्रति प्रतिबन्धकत्वे मानाभाव इति वाच्यम्। तेषां शाब्दबोधसामग्रीविघटनद्वारा तत्प्रतिबन्धकत्वस्य अनुभवसिद्धत्वात्। अन्वयव्यतिरेकयोरेव प्रमाणत्वात्। तत्र च्युतसंस्कृतिना साधुत्वज्ञानस्य, क्लिष्टेन आसत्तिज्ञानस्य, अभवन्मतयोगेन आकांक्षायोग्यताज्ञानयोश्च विघटनात्।

न च एवमपि प्रतिकूलवर्णादिदोषाणामपि काव्यापकर्षकत्वमेव, न पुनः काव्यत्वव्याघातुकत्वम्। तथा च तादृशदोषाक्रान्ते काव्यविशेषेऽव्याप्तितादवस्थ्यमिति वाच्यम्। तथा सति रसप्रतिबन्धकदोषान्विहाय शाब्दबोधप्रतिबन्धकदोषाभावस्यैव निवेशनेन दोषाभावात्।

न च शाब्दबोधसामग्रीप्रतिबन्धकत्वेऽपि न शाब्दबोधप्रतिबन्धकत्वं तेषाम्। शाब्दबुद्धित्वावच्छिन्नं प्रति आकांक्षादिज्ञानस्यैव कारणत्वेन च्युतसंस्कृत्यभावादेः कारणत्वे मानाभावात्। कारणीभूताभावप्रतियोगित्वस्यैव प्रतिबन्धकत्वपदार्थत्वात्। प्रयोजकीभूताभावप्रतियोगित्वं तु न प्रतिबन्धकत्वम्। तस्य चातिप्रसक्तत्वात्। तान्त्रिकानभ्युपगतत्वाच्च। अत एव सर्वैरपि ग्रन्थकारैः उपाधेर्हेत्वाभास बहिर्भावस्वीकारः सङ्गच्छते। तथा च दर्शितरीतिः न सम्भवति इति वाच्यम्। शाब्दबुद्धित्वावच्छिन्नजन्यतानिरूपितजनकतावच्छेदकरूपावच्छिन्नप्रतिबध्यतानिरूपितप्रतिबन्धकतावच्छेदकधर्मावच्छिन्नप्रतियोगिताकाभावस्य निवेशे क्षतिविरहात्।

तथा च न च एवमपि साधुत्वज्ञानस्य शाब्दबोधहेतुत्वे मानाभावात् (वः)। असाधुत्वात्मकच्युतसंस्कृतिज्ञाने शाब्दबोधानुदयेन असाधुत्वज्ञानाभावस्य कारणतास्वीकारस्य आवश्यकतया शाब्दबोधप्रतिबन्धकत्वनिर्वाहेऽपि तत्सामग्रीविघटकत्वानिर्वाहाच्च। तदुक्तं काव्यप्रदीपे 'कस्यचिद्वाक्यार्थबोधाभावात् यथा च्युतसंस्कृत्यादेः' इति। अत्र प्रभाकारैश्च नाधीत इत्यादौ असाधुत्वज्ञानस्य शाब्दबोधप्रतिबन्धकत्वम् इति च्युतसंस्कृतेः सङ्ग्रहो न सम्भवति इति वाच्यम्। तदसङ्ग्रहे बाधकाभावात्। न च गुणालङ्कारवति च्युतसंस्कृतिदोषदूषिते पद्यविशेषे अतिव्याप्तिः इति वाच्यम्। तस्यापि लक्ष्यताया एव स्वीकारात्। किन्तु अपकर्षमात्रमेव तस्य काव्यस्य। काव्यत्वव्याघातुकदोषबहिर्भावश्च तस्य स्वीक्रियते। अत एव रसगङ्गाधरमर्मप्रकाशे नागोजिभट्टैः दोषपदेन

स्फुटदोषराहित्यविवक्षणमाशङ्क्य, 'स्फुटत्वं च शाब्दबोधप्रतिबन्धकत्वम्। तेन निराकांक्षत्वानासन्नत्वे गृह्येते इत्युक्तं सङ्गच्छते। न च तैः च्युतसंस्कृत्यादयः संगृहीताः। ततः तेषां काव्यापकर्षकत्वमेव तदभिमतम् इत्युन्नीयते' इति।

एतेन स्वयमेव अदोषपदेन दोषसामान्यशून्यत्वनिवेशनमुत्प्रेक्ष्य तादृशस्यैकान्तमसम्भवात् काव्यस्य प्रविरलविषयत्वनिर्विषयत्वयोरापादनं, सति सम्भवे ईषद्दोषौ इति कञ्चिदर्थं प्रकल्प्य तस्यापि रत्नादौ कीटानुवेधादिवत् अपरिहार्यत्वप्रदर्शनञ्च प्रत्युक्तं वेदितव्यम्। अस्मदुक्तविवक्षणे तथाविधकाव्यस्य सर्वत्र सौलभ्यात्। काव्यापकर्षकदोषाणां रसादिवैचित्र्ये परिहार्यत्वेऽपि काव्यत्व-व्याघातुकानां सर्वथा परिहार्यत्वात् रसादिवैचित्र्ये काव्यापकर्षकदोषदूषितेष्वपि काव्यत्वम् अवर्जनीयम् इत्याशयेन 'दुष्टेष्वपिमता' इत्युक्तेरपि सूपपादतया तस्यापि विरोधस्याभावादिति।

वस्तुतस्तु अदोषौ इत्यत्र दोषपदं दोषसामान्यपरमेव। तस्य लक्षणया दोषविशेषपरत्वकल्पने गौरवात्। व्याप्यधर्मावच्छिन्नशक्तपदस्य व्यापकधर्मा-वच्छिन्नोपस्थापकताया इव व्यापकधर्मावच्छिन्नशक्तपदस्य व्याप्यधर्मा-वच्छिन्नोपस्थापकताया अपि लक्षणैकनिर्वाह्यत्वात्। दोषत्वं च मुख्यार्थापकर्षकत्वम्। मुख्यार्थश्च रसो वाच्यश्च। तयोरेव काव्ये प्राधान्येन चमत्काराधायकतया तात्पर्यविषयत्वात्। तदुक्तं प्रकाशे 'मुख्यार्थहतिर्दोषो रसश्च मुख्यस्तदाश्रयाद्वाच्यः। उभयोपयोगिनस्स्युः शब्दाद्यास्तेन तेष्वपि सः' इति। मुख्यार्थस्य हतिः यस्मात् इति गमकत्वात् व्यधिकरणो बहुव्रीहिः। हतिश्चात्र अपकर्षः। हन्यते अपकृष्यते रसादिः अनेन इति करणव्युत्पत्त्या अपकर्षहेतुपरहतिशब्देन षष्ठीतत्पुरुषो वा। मुख्यत्वमर्थस्य न शक्यत्वलक्षणम्। रसादीनामतथात्वेन लक्षणासङ्गतेः। किन्तु अन्यादृशमेव इत्याह—रसश्चेति। रस्यते आस्वाद्यते इति व्युत्पत्त्या रसपदेन भावादीनामपि सङ्ग्रहः। नन्वेवं नीरसेषु न कश्चिद्दोषस्स्यात्। अपकर्षणीयस्य रसस्याभावात् इत्यत आह—तदाश्रयादिति। आश्रयणमाश्रयः। तेन रसेन आश्रयणात् उपयोगित्वेनापेक्षणात् वाच्योऽपि मुख्य इत्यर्थः। ननु एवं रसवाच्ययोरेव दोषाश्रयत्वम् उचितम्। न तु शब्दादीनामित्यत आह—उभयोपयोगिन इत्यादि। अत्र च शब्द्यते शाब्दबोधविषयीक्रियते अर्थः अनेनेति व्युत्पत्त्या शब्दपदेन प्रतिपादनात्मकशब्दनाव्यापारवतोः पदवाक्ययोः

लाभः। अत एव 'आद्य पदात् वर्णरचने सङ्गृहीते' इति प्रकाशोक्तिः सङ्गच्छते। अन्यथा वर्णस्यापि शब्दपदेनैव सङ्ग्रहात् शब्दाद्या इति बहुवचनासंगतेः।

ननु एतत् अनुपपन्नम्। हतिशब्दस्य अपकर्षपरत्वे रसानुत्पत्तिप्रयोजकेषु दोषेषु अव्याप्तेः। अनुत्पत्तिपरत्वे च रसापकर्षमात्र-प्रयोजकेष्वव्याप्तेश्च। तदेतल्लक्षणम् अतिदरिद्रदम्पत्योः कृशतरनिशावकुण्ठनीयवसनमिवैके नापकृष्यमाणम् अपरं परिहरति। किञ्चार्थरूपस्य मुख्यार्थस्य अनुत्पत्तिरपकर्षो वा न दोषाधीन इति चेत्—अत्रोच्यते। प्रतीतिप्रतिबन्धो हतिशब्दार्थः। मुख्यत्वञ्च अर्थस्योद्देश्यप्रतीतिविषयत्वम्। तच्च रसवाच्योभयानुगतम् इति तयोरेकरूपेणैवानुगमः। तथा च मुख्यार्थस्य हतिः यस्मात् हति विग्रहवाक्ये षष्ठ्यर्थो विषयत्वम्। तस्य चाधेयतासम्बन्धेन प्रकृत्यर्थान्वितस्य निरूपकतासम्बन्धेन हतिपदार्थैकदेशप्रतीतौ अन्वयः। पञ्चम्यर्थः प्रयोज्यत्वम्। तस्य स्वरूपसम्बन्धेन हतिपदार्थे अनुत्पत्तिलक्षणप्रतिबन्धे अन्वय :। इत्थं च, उद्देश्यप्रतीतिविषयीभूतार्थनिष्ठविषयतानिरूपकप्रतीतिप्रतिबन्धो यत्प्रयुक्तः इति विग्रहवाक्यार्थे(र्थः)बोधानन्तरं बहुब्रीहौ उत्तरपदलक्षणानुशासनानुसारेण हतिशब्दस्य तादृशप्रतीतिप्रतिबन्धप्रयोजके लक्षणया दोषपदस्य दोषपदार्थपरतया च, तादृशप्रतीतिप्रतिबन्धप्रयोजको दोषपदार्थ इति लक्षणवाक्यार्थलाभः। प्रतिबध्यप्रतीतेः उद्देश्यप्रतीतिविषयार्थविषयकत्वेन निवेशनस्य शिरोवेष्टनेन नासिकास्पर्शनसमशीलतया उद्देश्यप्रतीतित्वेनैव लक्षणे निवेशः क्रियते। तथा च उद्देश्यप्रतीतिप्रतिबन्धकत्वं दोषसामान्यलक्षणम् इति फलति। लक्ष्यतावच्छेदकं च दोषपदवच्यत्वम् इति न लक्षणलक्ष्यतावच्छेदकयोरभेदः।

उद्देश्या च प्रतीतिः रसवति अविलम्बिता, अनपकृष्टरसविषया च। नीरसे तु अविलम्बिता चमत्कारिणी च अर्थविषया। काव्ये तादृश्या एव प्रतीतेः तात्पर्यविषयत्वात्। दोषग्रहे च क्वचिद्रसस्यैव अप्रतीतेः, क्वचित्प्रतीयमानस्यापि अपकर्षात्, क्वचिच्च विलम्बात्, नीरसेऽपि क्वचित् अर्थस्य मुख्यभूतस्यैव अप्रतीतेः, क्वचिद्विलम्बेन प्रतीतेः, क्वचिच्च चमत्काराभावाच्च, विशेष्यभूतप्रतीत्यनुत्पत्त्या वा विशेषणानुत्पत्त्या वा विशिष्टप्रतीत्यनुत्पत्तेः सार्वत्रिकत्वात्, सर्वेष्वेव दोषेषु उद्देश्यप्रतीतिप्रतिबन्धकत्वलक्षणम् अक्षतमेव। प्रतिबन्धकत्वमपि साक्षात्परम्परासाधारणमेव विवक्षितम्। तेन

साक्षादुद्देश्यप्रतीतिप्रतिबन्धकानां रसदोषाणां, परम्परया तादृशानां शब्दार्थदोषाणाञ्च संग्रहस्सुकरः।

शब्दार्थदोषेष्वपि असमर्थत्वादेः अर्थोपस्थितेरभावात्, निहतार्थत्वादेः विलम्बात्, च्युतसंस्कृत्यादेः वाक्यार्थबोधाभावात्, क्लिष्टत्वादेः तत्र विलम्बात्, निरर्थकत्वादेः सहृदयवैमुख्यव्यग्रताद्यापादनात्, विरसविरुद्धमतिकृत्त्वादेः विरोध्युपस्थापनात् विपरीतोपस्थापनाद्वा प्रतिबन्धकत्वम् इत्यादि स्वयमूह्यम्।

स च दोषो नित्यानित्यभेदाद् द्विविधः। तत्र अनुकरणनिवर्तनीयत्वे सति तदितरानिवर्तनीयत्वं नित्यत्वम्। तद्वदन्यत्वम् अनित्यत्वम् इत्यन्यदेतत्।

ननु एवं सति दोषज्ञानस्यैव प्रतिबन्धकतया स्वरूपसतो दोषस्य अतथात्वेन उद्देश्यप्रतीतिप्रतिबन्धकत्वलक्षणस्य असम्भव एव। प्रतिबन्धकज्ञान-विषयत्वविवक्षणे समूहालम्बनज्ञानमादाय उदासीनपदार्थमात्रे अतिप्रसङ्गः। प्रतिबन्धकतावच्छेद(क)विषयतावत्त्वविवक्षणे च दोषैकदेशे अतिप्रसङ्गो दुर्वारः। अनतिरिक्तवृत्तित्वरूपावच्छेदकत्वनिवेशे च असम्भव एव। श्रुतिकटुत्वविशिष्ट-वर्णरूपदोषविषयकत्वस्य केवलवर्णविषयकज्ञानेऽपि सत्वात् विशिष्टशुद्धयोः अनतिरेकात् इति चेत्—मैवम्। अनाहार्याप्रामाण्या(ण्य)-ज्ञानानास्कन्दित-निश्चयवृत्तित्वविशिष्ट-यद्रूपावच्छिन्नविषयिताव्यापिका, उद्देश्यप्रतीतिप्रतिबन्धकता तद्रूपावच्छिन्नं दोषत्वमिति विवक्षणेन दर्शितसकलदोषोद्धारात्।

ननु अत्र दोषतावच्छेदकं यद्रूपपदार्थः। तच्च न केवलं श्रुतिकटुवर्णत्वादिकम्। तदवच्छिन्नविषयकज्ञानस्य रौद्ररसादिविषयकोद्देश्य-प्रतीतिप्रतिबन्धकत्वाभावेन व्यापकताभङ्गापत्तेः। अनुकरणे च सर्वेषाम् अपि दोषाणां दोषत्वानङ्गीकारात्। वक्तृप्रतिपाद्यव्यङ्ग्यवाच्यप्रकरणादिमहिम्ना च केषाञ्चित् तदभावात्। तदुक्तं प्रकाशे 'ख्यातेर्थेऽर्थे निर्हेतोरदुष्टतानुकरणे तु सर्वेषाम्। वक्त्राद्यौचित्यवशाद्दोषोऽपि गुणः क्वचिन्नोभौ' इति।

ननु अनुकरणादौ श्रुतिकटुवर्णादेः अदोषत्वं कुत इति चेत्—दूषकताबीजाभावात्। अनुकार्यानुकरणयोरैकरूप्यस्य समुचितत्वेन तत्र वैरस्याभावे स्वानुभाविकत्वेन तदतिरिक्तस्थल एव दोषत्वव्यवस्थितेः। स्वसदृशशब्द-मात्रबोधतात्पर्यकोच्चारणविषयत्वमनुकरणत्वम्। स्वसदृशशब्द-प्रतिपाद्यत्वे सति

शब्दत्वम् अनुकार्यत्वम्। तदिदं काव्यप्रदीपे सम्यगुपपादितम्। यथा 'अत्र कार्तार्थ्यमिति पदं परुषवर्णप्रायम्। किं पुनरस्य दूषकताबीजम् उद्वेगजनकत्वमिति चेत्—न। रौद्रादावपि दोषत्वप्रसङ्गात्। माधुर्यव्यञ्जकरचनामध्यगुम्फितमेव तदुद्वेजयतीति चेत्—किं तादृशत्वेन ज्ञातं तत्तथा। उत स्वरूपसदेव। नाद्यः। रसविशेषव्यञ्जकत्वाज्ञानेऽपि प्राथमिकतादृशपदश्रवणेन उद्वेगाभावप्रसङ्गात्। न चेष्टापत्तिः। अनुभवविरोधात्। अन्त्ये तु सत्यादयः प्रमाणम्। न हि अविदितविशेषानपि तत्रैव तदुद्वेजयति। नान्यत्र इति प्रमाणमस्ति। किं चैवं वैयाकरणादौ वक्तरि किं निबन्धनो दोषत्वाभावः स्यात्। अत्रोच्यते। स्वायत्ते शब्दप्रयोगे कर्णोपतापकशब्दप्रयोगेण श्रोतुरुद्वेगो रसापकर्षाय इति स एव तद्बीजम्। अत एव प्रतिकूलवर्णादस्य भेदः। तस्य कर्णोपतापाहेतुत्वात्। अत एव च अनुकरणे वैयाकरणादौ वक्तरि श्रोतरि वा रौद्रादौ रसे व्यङ्ग्ये नीरसे च काव्ये अस्य दोषत्वाभावः। आद्ये तस्यैवानुकरणीयतया स्वायत्त्यभावात्। द्वितीये च तत्स्वभावावगमेन उद्वेगाभावात्। तृतीये च श्रोतुः तेनानुद्वेगात्। चतुर्थे तदनुगुणत्वेन उद्वेगाहेतुत्वात्। पञ्चमे मुख्यार्थहतेः अभावात्। एवं अर्थौचित्यप्रकरणादिवशेन अपि अनुद्वेजकतया दोषत्वाभाव उपपद्यत इति।

तथा च लक्षणमिदमसम्भवग्रस्तमिति चेत्—न। अनुकार्यत्व-वक्तृ-प्रतिपाद्यव्यङ्ग्यवाच्यवैचित्र्यप्रकरणादिभिः उद्देश्यप्रतीतिप्रतिबन्धकताविघटनस्य अनुभवसिद्धतया तदनुरोधेन तेषाम् उत्तेजकतां प्रकल्प्य तत्तदभावविशिष्ट-श्रुतिकटुवर्णादेरेव उद्देश्यप्रतीतिप्रतिबन्धकत्वमुररीक्रियते। दाहं प्रति तदुत्तेजकाभावविशिष्टमण्यादेरिव अनुकरणादिरूपतत्तदुत्तेजकसमवधानस्थलीय-श्रुतिकटुवर्णादेः अपि प्रतिबन्धकतावच्छेदकतापर्याप्त्यधिकरणधर्मवैशिष्ट्याभावात् प्रतिबन्धकत्वाभा(व)स्सुसंपाद एव। यद्रूपपदेनापि अनुकरणाद्यभावविशिष्टश्रुति-कटुवर्णत्वादेरेव धर्तव्यतया तद्रूपावच्छिन्नविषयिताव्यापकत्वप्रतिबन्धकता-यामव्याहतमेवेति नासम्भवावकाशः।

इत्थञ्च स्वतस्सिद्धप्रतिबन्धकाभावस्थले उत्तेजकवशसम्पन्नतदभावस्थले च विशेष्याभावात् विशेषणाभावाच्च उद्देश्यप्रतीतिप्रतिबन्धकतावच्छेदकविषयितानि-रूपकतावच्छेदकत्वपर्याप्त्यधिकरणरूपावच्छिन्नप्रतियोगिताकाभावपर्यवसितदोष-सामान्यशून्यत्वविशेषणं सुघटमेव।

न्यक्कारो ह्ययमिति प्रागुदाहृतपद्ये हि अयंपदन्यक्कारपदयोः उद्देश्यविधेयार्थकत्वेन विवक्षितयोः पौर्वापर्यविपर्ययात् अविमृष्टविधेयांशदोष इति दर्पणकारोक्तं यद्यपि सत्यमेव—तथापि तत्र वाच्यव्यङ्ग्यवैचित्र्यसद्भावात् तस्य दोषत्वाभावः तेन न पर्यालोचितः। पूर्वोक्तयुक्त्या वाच्यव्यङ्ग्य-वैचित्र्याद्यभावविशिष्टस्यैव तस्य दोषत्वव्यवस्थितेः वक्तृप्रतिपाद्यवाच्यव्यङ्ग्य-प्रकरणाद्यौचित्यज्ञानसमानाधिकरणस्य तत्रत्यदोषज्ञानस्याप्रतिबन्धकत्वाच्च।

तथा च तत्रापि विशेषणाभावप्रयुक्तविशिष्टाभावसम्पत्त्या दोषसामान्य-शून्यत्वविशेषणम् अक्षतमेवेति क्व काव्यलक्षणाव्याप्तिः। न चैवं सति उक्तपद्यस्य प्रकाशे अविमृष्टविधेयांशदोषोदाहरणताप्रदर्शनासङ्गतिः इति वाच्यम्। वाच्यव्यङ्ग्यवैचित्र्यप्रतीतिरहितं प्रति 'दोषत्वाभावाभिप्रायेण (दोषत्वाभिप्रायेण) तदुदाहरणताप्रदर्शनेन विरोधाभावात्' तदुदाहरणस्य दोषपरिचयमात्रार्थत्वाच्च। तथा च न तस्य काव्यस्य दुष्टत्वप्रसङ्गः।

अत एव च अप्रतीत्वं तच्छास्त्रज्ञं प्रति अदोषः। अन्यं प्रति दोष इति सर्वसम्प्रतिपन्नं सङ्गच्छते। एतेन 'कीटानुविद्धरत्नादिसाधारण्येन काव्यता। दुष्टेष्वपि मता यत्र रसाद्यनुगमस्स्फुटः' इति तदुक्तयुक्तेरपि न विरोधः। रसादिवैचित्र्ये सति दुष्टस्यापि काव्यत्वस्याक्षतत्वात्। व्यङ्ग्यवैचित्र्यविरहविशिष्टस्य दोषस्य तत्राभावेन दोषसामान्यशून्यत्वघटितलक्षणस्य सुसङ्गतत्वादिति।

इदमत्र बोध्यम्। दोषसामान्यशून्यत्वं च उद्देश्यप्रतीतिप्रतिबन्धकतावृत्ति-धर्मावच्छिन्नप्रतियोगिताकाभाववत्त्वम्। तेन दोषत्वस्य यत्त्वतत्त्वघटितत्वेन अननुगमात् काव्यसामान्यलक्षणे तन्निवेशो न सम्भवति इति प्रत्युक्तम्। वृत्तित्वञ्च स्वसमानाधिकरणभेदप्रतियोगितावच्छेदकत्वसम्बन्धावच्छिन्नस्वनिष्ठावच्छेदकताक-प्रतियोगिताकभेदवत्त्वसम्बन्धेन। स्वाधिकरणता स्वावच्छिन्नविषयताशाल्यनाहार्या-प्रामाण्यज्ञानानास्कन्दितनिश्चयत्वसम्बन्धेन। भेदप्रतियोगितावच्छेदकता स्वरूपसम्बन्धेन। द्वितीयकल्पे स्वावच्छेदकाभावप्रतियोग्युपहितत्व स्वरूपान्यतरसम्बन्धेन। दर्शितदोषलक्षणे हेत्वाभाससामान्यलक्षणोक्तदिशा दूषणोद्भावनसमाधानप्रकाराः तर्ककुशलैः स्वयमूहनीया इत्यलमतिप्रसङ्गेनेति।

यत्तु 'रसार्थावबोधजनकतयाभिमता ये श्लेषप्रसादसमतादयो गुणाः तत्तद्व्यक्तित्वावच्छिन्नप्रतियोगिताकाभावकूटत्वमेव दोषत्वं न जात्यन्तरम्। यथा

श्रुतिकटुत्वं सौकुमार्याभावः। ग्राम्यत्वं कान्त्यभावः। तदुक्तं "यो हेतुः काव्यशोभायाः सोऽलङ्कारः प्रकीर्त्यते। गुणोऽपि तादृशो ज्ञेयो दोषस्स्यात्तद्विपर्यये" इति सरस्वतीकण्ठाभरणे भोजराजेन, तन्न मनोरमम्। गुणाभावकूटत्वं दोषत्वमिति स्वीकृत्य तत्तद्गुणानां तत्तद्व्यक्तित्वेन निवेशे गौरवात् अननुगमात्। किं गुणाभावकूटत्वं दोषत्वं दोषाभावकूटत्वं वा गुणत्वम् इत्यत्र विनिगमकाभावापत्तेश्च।

यदपि रसाभिव्यक्तिप्रतिबन्धकत्वं दोषत्वम्। न च वस्त्वलङ्कारान्यतर-मात्राभिव्यञ्जककाव्यनिष्ठदोषेष्वव्याप्तिः इति वाच्यम्। रसाभिव्यक्तिप्रतिबन्धकता-वच्छेदकतावच्छेदकजातिमत्त्वस्य विवक्षितत्वात्। सा च जातिर्दोषत्वमेवेति न कुत्रापि दोष इत्युक्तं, तदपि न यौक्तिकम्। तस्य जातित्वे मानाभावात्। तस्यापेक्षिकत्वात्। अन्यथा श्रुतिकटुवर्णादिः शृङ्गाररसाभिव्यक्तिप्रतिबन्धकत्वेन तत्समानाधिकरणदोषत्वजातेः रौद्ररसाभि-व्यक्तिस्थले(ली)येऽपि श्रुतिकटुवर्णादौ दुरपह्नवतया रौद्ररसाभिव्यञ्जककाव्यस्य दुष्टत्वापत्तेः दुर्वारत्वात् च।

एतेन 'द्रागर्थरसान्यतरधीप्रतिबन्धकत्वं तदवच्छेदकतया सिद्धो जातिविशेषो वा दोषत्वम्' इति दशमयूखव्याख्यायां वैद्यनाथोक्तं प्रत्युक्तम् इति बोध्यम्।

किञ्च दोषत्वस्य तत्तदसमवेतपदार्थसाधारणत्वेन जातित्वशङ्का न्यायविदां हृदयपदमपि नाधिरोहति इति अलमसदाग्रहेण।

सर्वमिदमालोच्यैव काव्यप्रकाशकारैः दौषत्वं जातिः इत्यनुक्त्वा 'मुख्यार्थहतिर्दोषः' इति अन्यादृशमेव दोषत्वम् उक्तम्। तदेव च युक्तियुक्तमिति परिष्कृतमस्माभिः।

इदमेव च दोषलक्षणं बहुभिरङ्गीकृतम्। काव्यदर्पणे राजचूडामणिदीक्षितास्तु प्रकाशोक्तमेव दोषलक्षणं किञ्चित्परिवर्त्य प्रकारान्तरेण परिष्कारमकार्षुः। यथा—'रसापकर्षहेतुत्वं दोषत्वं परिकीर्तितम्।' रस्यत इति रसो व्यङ्ग्यमात्रम्। तदपकर्षहेतुत्वं च तत्प्रतीतिप्रतिबन्धकत्वम्। ततश्च व्यङ्ग्योपस्थितिप्रतिबन्धकत्वं दोषत्वम्। एतेन व्यङ्ग्यभूतवस्त्वलङ्कारापकर्षहेतुभूते दोषे अव्याप्तिः, रसपदस्य व्यङ्ग्यमात्रपरत्वे अपि अपराङ्गवाच्यसिद्ध्यङ्गादौ

गुणीभूतव्यङ्ग्ये व्यङ्ग्यस्य रसादेः भावाद्यङ्गतया अपकर्षात् अतिव्याप्तिः इत्यपास्तम्। व्यङ्ग्यप्रतीतिप्रतिबन्धकस्यैव, दोषत्वेन विवक्षितत्वात्।

ननु एवमपि श्रुतिकटुप्रभृतीनां रौद्ररसोपस्थित्यप्रतिबन्धकत्वात् अव्याप्तिः।

न च तत्तद्रसोपास्थितिप्रतिबन्धकत्वं तत्तद्रसदोषत्वम् इति वाच्यम्। तथा सति अननुगमात् इति चेत्—न। यद् ज्ञाने सति क्वचिदपि स्वारसिक-व्यङ्ग्योपस्थितिप्रतिबन्धो भवति इत्येव विवक्षितं, न तु यद् ज्ञाने सति भवत्येव इति। तथा च श्रुतिकटुत्वादिज्ञाने रौद्ररसाप्रतिबन्धेऽपि शृङ्गारसप्रतिबन्धात् न दोषः। न च एवमपि नेयार्थादौ विलम्बेनापि तदुपस्थितेः न रसोपस्थितिप्रतिबन्धकता इत्यव्याप्तिः इति वाच्यम्। स्वारसिकोपस्थितिप्रतिबन्धकत्वस्यैव विवक्षितत्वात्। तादृशोपस्थितिप्रतिबन्धकत्वं च उपस्थितेरनुत्पत्तौ विलम्बेनोत्पत्तावपि अस्तीति न दोषः। न च एवमपि वाक्यार्थपदपदैकदेशरचनादिदोषाणामसङ्ग्रहः इति वाच्यम्। रसस्याश्रयो वाक्यार्थः। रसवाक्यार्थयोरुभयोरपि पदपदैकदेशादय उपयोगिनः। तेन वाक्यार्थादिदोषाणामपि परम्परया रसप्रतीतिप्रतिबन्धकत्वमस्ति इति नाव्याप्तिः। एवञ्च यद्ज्ञानप्रयुक्तः क्वचिदपि स्वारसिकव्यङ्ग्योपस्थितिप्रतिबन्धः तत्त्वं दोषत्वम् इति पर्यवसितोऽर्थः। तेन स्फुटाख्यगुणीभूतव्यङ्ग्ये व्यङ्ग्यस्य स्वारसिकोपस्थित्यभावो न दोषज्ञानप्रयुक्तः, किन्तु स्वरूपप्रयुक्त एवेति न तत्रातिव्याप्तिः।

इदं त्ववधेयम्। ये तावत् आकाङ्क्षासत्तियोग्यताविरहपर्यवसायिनो दोषाः वाक्यार्थज्ञानप्रतिबन्धद्वारा रसप्रतीतिप्रतिबन्धकाः, श्रुतिकटुप्रमुखास्तु न तथा। ते तेषामसामर्थ्यादेव न व्यञ्जकत्वं इति साक्षादेव प्रतिबन्धकाः। यथा नैयायिकैः 'पर्वतो वह्निमान् धूमवत्वात्, इत्यादिवादिप्रयुक्तात् न्यायवाक्यादेव अन्वयबोधो न तु तत्समानार्थकादपि 'पर्वते अग्निः धूमो यतः' इति वाक्यात् इति कथकसम्प्रदायानुरोधात् अङ्गीक्रियते। तथा श्रुतिकटुप्रमुखदोषरहितादेव पदादेश्चमत्कारः। नातथाभूतात् इति हि आलङ्कारिकसम्प्रदायानुरोधात् अङ्गीकार्यम्। अविशेषात् इत्याहुः इति।

किञ्च एतादृशदोषसामान्यशून्यत्वस्य काव्यलक्षणघटकत्वे क्वचिदनुपपत्तिमाशङ्क्य एवं समादधिरे। ननु न दोषाभावस्य लक्षणान्तर्गतिः युक्ता। तथा

सति 'निश्शेषच्युतचन्दनं स्तनतटं निर्मृष्टरागोऽधरो नेत्रे दूरमनञ्जने पुलकिता तन्वी तवेयं तनुः। मिथ्यावादिनि दूतिबान्धवजनस्याज्ञातपीडागमे वापीं स्नातुमितो गतासि न पुनः तस्याधमस्यान्तिकम्' इत्यस्यापि काव्यत्वं न स्यात्। तत्रापि 'अनुवाद्यमनुक्त्वैव न विधो(धे)यमुदीरयेत्' इत्युक्ततया स्तनतटमित्यस्यैव प्रथमं निर्देष्टुमुचितत्वात्; तथा निर्देशाभावेन अविमृष्टविधेयांशस्य जागरूकत्वात्। न चेष्टापत्तिः। तस्योत्तमकाव्यत्वेन सर्वैरुदाहरणात्। किञ्च एवं काव्यव्यवहारः प्रविरलविषयस्स्यात् इति चेत्—न। 'नीरसो हि निबन्धो यस्सोपशब्दो महाकवेः' इति ध्वनिकृदुक्त्या रसाभिव्यञ्जकमेव वाक्यम् इह लक्ष्यम्। न च दोषसत्वे रसाभिव्यक्तिः सम्भवति। रसाभिव्यक्तिप्रतिबन्धकस्यैव दोषत्वात्। अन्यथा तस्य हेयतैव न स्यात्। निश्शेषच्युतचन्दनम् इत्यादिकं दुष्टमेव। सदोषादपि तस्माद्दोषाज्ञाने रसाभिव्यक्तेः उत्तमकाव्यत्वव्यवहारः।

वस्तुतस्तु अदुष्टमेवोत्तमकाव्यम्। अन्यथा काव्यतदाभासविवेको न स्यात्। प्रविरलविषयता च काव्यव्यवहारस्य यथाहुर्ध्वनिकृतः 'अत एव द्वित्रा एव कवयो द्वित्राण्येव काव्यानीति'।

ननु एवमपि दोषाणामननुगमात् तदभावघटितलक्षणस्य अपि अननुगम इ(ए)व। न च रसाभिव्यक्तिप्रतिबन्धकत्वेन दोषाणामनुगमः इति वाच्यम्। तथापि रौद्ररसाभिव्यञ्जकश्रुतिकटुवर्णयुक्तश्लोकाव्याप्तेः। श्रुतिकटुत्वस्य शृङ्गाररसाद्यभिव्यक्तिप्रतिबन्धकत्वेन। क्वचिद्दोषत्वात्। तत्तत्पद्याभिव्यङ्ग्यरसप्रतिबन्धकदोषाभावविवक्षायां अननुगमतादवस्थ्यम् इति चेत्—न। अतीतानागतवर्तमानतत्तत्काव्याभासव्यक्तिवृत्तितत्तद्दोषव्यक्तिविषयक..........प्रतियोगिज्ञानविषयत्वेन अनुगमे तदभावघटितलक्षणस्य अनुगमसम्भवात् इत्येके। लक्ष्यस्यापि अननुगतत्वात् लक्षणाननुगमो न दोषाय—इत्यन्ये इति।

तत्रेदमुच्यते। रस्यत इति व्युत्पत्त्या रसपदेन व्यङ्ग्यमात्रसङ्ग्रहप्रदर्शनं न रमणीयम्। व्यङ्ग्यमात्रस्य लक्षणयैव रसपदेन सङ्ग्रहस्य वाच्यतया लक्ष्यतावच्छेदकस्य आस्वाद्यत्वस्य भावतदाभास-साधारण्येऽपि वस्त्वलङ्कारसाधारण्यासम्भवात्। आस्वाद्यत्वं (ह्यलौकिक) मानस-साक्षात्कारविषयत्वम्। तच्च वस्त्वलङ्कारयोः कथमुपपद्यताम्। किञ्च स्वारसिकव्यङ्ग्यप्रतीतिघटितदोषलक्षणविवक्षणमपि न समञ्जसम्। तस्य दुर्निरूपत्वात्। अपि च यद्ध्यानप्रयुक्तः

क्वचिदपि स्वारसिकव्यङ्ग्योपस्थितिप्रतिबन्धः तत्त्वं दोषत्वम् इति निष्कर्षकरणमपि नोचितम्। तत्तद्दोषोदासीनपदार्थोभय-विषयकसमूहालम्बनज्ञानप्रयुक्तत्वस्य स्वारसिकव्यङ्ग्य-प्रतीतिप्रतिबन्धे दुरपह्नवतया तत्रातिव्याप्त्यापत्तेः। न च यद्रूपावच्छिन्नविषयताप्रयुक्तः तादृशप्रतीत्यभावः तद्रूपावच्छिन्नत्वं दोषत्वमिति विवक्षणात् न दोषः। समूहालम्बनज्ञानीयोदासीनपदार्थनिष्ठविषयतायाः तादृशप्रतीत्यभाव-प्रयोजकत्वाभावात्, तत्प्रतिबन्धकतावच्छेदकविषयताया एव तथात्वादिति वाच्यम्। तथापि दोषैकदेशविषयताया अपि प्रतिबन्धकतावच्छेदकत्वात् तस्याः तादृशव्यङ्ग्यप्रतीतिप्रतिबन्धप्रयोजकत्वाक्षतेः तत्रातिव्याप्त्यापत्तेः दुर्वारत्वात्। न च यद्रूपावच्छिन्नविषयतासामान्यप्रयुक्तः तादृशव्यङ्ग्यप्रतीत्यभावः तद्रूपावच्छिन्नत्वं दोषत्वम् इति विवक्षणात् न दोषैकदेशातिव्याप्तिः। दोषैकदेशमात्रविषयकज्ञानीयतद्विषयतायाः तादृशप्रतीति-प्रतिबन्धकतावच्छेदकत्वाभावेन तदभावप्रयोजकत्वासम्भवात् इति वाच्यम्। तथा सति श्रुतिकटुवर्णत्वावच्छिन्नविषयतासामान्यान्तर्गताया रौद्ररसाभिव्यञ्जककाव्य-निष्ठश्रुतिकटुवर्णज्ञानीयतद्विषयतायाः रौद्ररसप्रतीतिप्रतिबन्धकतावच्छेदकत्वाभावेन तादृशप्रतीत्यभावप्रयोजकत्वासम्भवेन श्रुतिकटुवर्णादौ अव्याप्तेः। किं बहुना। अनुकरणे सर्वेषामेव दोषाणाम् अदोषतास्वीकारेण अनुकरणस्थलीयदोष-विषयतायाः यद्रूपावच्छिन्नविषयतासामान्यान्तःपातिन्याः स्वारसिकव्यङ्ग्यप्रतीत्यभाव-प्रयोजकत्वाभावेन असम्भवे एव पदमासादयति। तथा दोषसामान्यशून्यत्वस्य 'निश्शेषच्युतचन्दनम्' इत्यादौ अभावात् अव्याप्तिमाशङ्क्य तस्य दुष्टतायाम् इष्टताप्रदर्शनेन समाधानमपि न साधीयः। तस्योत्तमकाव्यत्वेन सर्वैरुदाहरणात् इति स्वेनैव तस्य दुष्टतायाम् इष्टापत्तेः निरस्ततया पुनः स्वयमेव तत्र इष्टापत्त्युद्भावनस्यानुचितत्वात्। दोषाज्ञानेनैव तस्य उत्तमकाव्यत्वव्यवहारः इत्यनेन तत्र रसास्वादयितॄणां सर्वेषामपि सहृदयशिरोमणीनामज्ञानं कल्पयित्वा व्यवहारस्य भ्रान्तिमूलकत्वकल्पनस्य अन्याय्यत्वाच्च। एवं................ नुपपत्त्युद्भावनं, काव्यव्यवहारस्य प्रविरलविषयताङ्गीकरणं च अनुचितमेव। अस्मदुक्तरीत्या दोषलक्षणं परिष्कृत्य तत्तदौचित्याभावविशिष्टदोषसामान्याभावस्य निवेशे काव्यतदाभासविवेकानुपपत्तिलेशाभावात्। विशिष्टाभावसत्त्वे काव्यत्वम्। विशिष्टदोषसत्वे काव्याभासत्वं चेति तदुपपत्तेः। काव्यव्यवहारस्यापि अस्मत् पक्षे प्रचुरतरविषयतासम्भवाच्च।

किं च दोषाणाम् अननुगमात् तदभावघटितकाव्यलक्षणस्यापि अननुगमः इत्याशङ्क्य दोषानुगमप्रकार(रा)प्रदर्शनमपि न परिष्कारकुशलानां हृदयमावर्जयति। तादृशा(न)?नुगमकरूपस्य परिच्छेतुम् अशक्यत्वात्। 'काव्यं काव्यम्' इत्यनुगत-व्यवहारस्य अनुगतधर्ममन्तरा निर्वाहासम्भवेन लक्षणाननुगम-स्वीकारानौचित्याच्च।

वस्ततस्तु दोषाभावगुणालङ्काराणाम् अनुगतरूपेणैव निवेशस्य प्रदर्शितत्वेन तत्पक्षे चमत्कारत्वव्याप्यजातिविशेषावच्छिन्नप्रतिबध्यतानिरूपित-प्रतिबन्धकतावच्छेदकविषयतावच्छेदकरूपावच्छिन्नप्रतियोगिताकाभाववत्त्वे सति तादृशजातिविशेषावच्छिन्नजन्यतानिरूपितजनकतावच्छेदक-विषयतावच्छेदक-रूपवत्त्वस्यै(व) लक्षणत्वेन न कोऽपि दोषः। रौद्ररसाभिव्यञ्जककाव्ये तत्रत्यगुणालङ्कारादिविशिष्टशब्दार्थज्ञानजन्यचमत्कारं प्रति तत्रत्य श्रुतिकटुवर्णज्ञानस्य अप्रतिबन्धकत्वेन लक्षणसङ्गतेः अक्षतत्वात्। एवम् अनुकरणवक्तृप्रतिपाद्यव्यङ्ग्यवाच्यप्रकरणाद्यौचित्ये सति तत्स्थलीयचमत्कारं प्रति तत्स्थलीयतत्तद्दोषज्ञानस्य अप्रतिबन्धकत्वात् तत्र तत्र लक्षणसमन्वयः सुकर एव।

इत्थं च 'न्यक्कारो ह्ययम्' इति साहित्यदर्पणोदाहृते 'निश्शेषच्युत-चन्दनम्' इति काव्यदर्पणोदाहृते च पद्यविशेषे लक्षणसङ्गतिः अक्षतैव। तत्रत्यदर्शितदोषज्ञानस्य तत्रत्यवाच्यव्यङ्ग्यवैचित्र्यज्ञानजन्यचमत्कारप्रतिबन्धक-त्वाननुभवात्, काव्योषाणां परिचयमात्रार्थमेव प्रकाशादौ तस्य दोषोदाहरणताप्रदर्शनेन दुष्टतायाः अनभिमतत्वात् इत्युक्तमेवेति। एतेन तत्तदौचित्याभावविशिष्टदोषाभावनिवेशोऽपि न साधीयान्। तत्तदौचित्यस्य अननुगतत्वात्। तदननुगमे लक्षणस्यापि अननुगम इति दूषणमपि प्रत्युक्तम्।

यदपि शब्दार्थयोः सगुणत्वं विशेषणम् अपि अनुपपन्नम्। गुणानां रसैकधर्मत्वस्य 'ये रसस्याङ्गिनो धर्माश्शौर्यादय इवात्मन' इत्यादिना तेनैव प्रतिपादित्वात् इति उक्तं, तदपि न युक्तम्। प्रकाश एव अष्टमोल्लासे गुणानां रसैकधर्मत्वसमर्थनानन्तरं सगुणौ शब्दार्थौ काव्यम् इति स्वोक्तकाव्यलक्षणे शब्दार्थयोः सगुणत्वविशेषणानुपपत्तिम् आशङ्क्य 'गुणवृत्त्या पुनस्तेषां वृत्तिश्शब्दार्थयोर्मता' इत्यनेन गौणवृत्तिसमाश्रयेण स्वयमेव समाहितत्वात्। विवृतं चैवं काव्यदर्पणे 'नन्वेवं गुणानां............लक्षणमुक्तम्। गुणानां

शब्दार्थधर्मत्वाभावात् इति आह। गुणवृत्त्येति। यथा आत्मधर्मस्यापि शौर्यस्य शौर्यशालिनी इयमाकृतिः इत्युपचारेण आकारवृत्तित्वव्यवहारः, तथा आत्मभूतरसधर्माणामपि गुणानां रसाङ्गभूतशब्दार्थवृत्तित्वव्यवहारः उपचारात् उपपन्नः' इति। मधुमतीकृतस्तु 'शरीरे सुखं इत्यादिप्रतीततिवत् शब्दार्थयोः माधुर्यादिप्रतीतिः परम्परासम्बन्धविषयिणी इति तत्र मधुरादिव्यपदेशो मुख्य एव। गौणत्वोक्तिस्तु साक्षात्सम्बन्धाभावनिबन्धना' इत्याहुः। समाहितं चैवमेव मतद्वयानुरोधेन शब्दार्थयोः गुणवत्त्वविशेषणानुपपत्तिमाशङ्क्य काव्यदर्पण एव काव्यलक्षणप्रस्तावे 'तथा गुणवत्त्वविशेषणमपि अयुक्तम्। गुणस्य रसधर्मत्वेन वक्ष्यमाणतया शब्दार्थधर्मत्वासिद्धेः। न च रसवत्त्वज्ञापनार्थमेव उपचारात् तथोक्तम् इति वाच्यम्। तथा सति रसवन्तौ इत्येव वक्तुमुचितम्। न हि 'शूरवन्तो देशा' इति वाच्ये 'शौर्यवन्तो देशा' इति वक्तारो भवन्ति इति पूर्वपक्षं पुनः अनूद्य, तदिदम् अयुक्तं 'गुणवृत्त्या पुनस्तेषां वृत्तिश्शब्दार्थयोर्मता' इति। यद्वा शरीरावच्छिन्नात्मनिष्ठस्यापि सुखस्य 'शरीरे सुखम् इति प्रतीतेः परम्परासम्बन्धेन यथा शरीरवृत्तित्वमङ्गीक्रियते तथा शब्दार्थाभिव्यङ्ग्यरसनिष्ठस्यापि गुणस्य शब्दार्थाविमौ मधुरौ' इत्यादिप्रतीतेः परम्परया शब्दार्थनिष्ठत्वाङ्गीकाराविरोधात् इति।

इत्थं च स्वाश्रयरसाभिव्यञ्जकत्वसम्बन्धेन गुणवत्त्वस्य विवक्षितत्वात् नानुपपत्तिगन्धोऽपि। न चैवं नीरसे वस्त्वलङ्कारव्यञ्जककाव्यविशेषे अव्याप्तिः। तत्र रसाभावेन तद्घटितपरम्परासम्बन्धेन गुणवत्त्वस्यापि अभवात् इति वाच्यम्। 'नीरसो हि निबन्धो यः सोऽपशब्दो महान्कवेः' इत्युक्त्या सर्वथा रसाभावे काव्यत्वस्यैव अभावापत्त्या तत्र यथा कथञ्चित् रससद्भावस्याङ्गीकरणीयतया दर्शितसम्बन्धेन गुणवत्त्वस्य निष्प्रत्यूहत्वात्। न चैवं 'शब्दचित्रं वाच्यचित्रमव्यङ्ग्यमधमं स्मृतम्' इति प्रकाशे रसादिरूपव्यङ्ग्यशून्यस्यापि काव्यप्रभेदत्वाङ्गीकारविरोध इति शङ्क्यम्। 'तत्सादृश्यमभावश्च तदन्यत्वं तदल्पता। अप्राशस्त्यं विरोधश्च नञर्थाः षट्प्रकीर्तिताः' इत्युक्तरीत्या अल्पार्थकनञ्पदसमभिव्याहृतव्यङ्ग्यपदेन अल्पव्यङ्ग्यवत्त्वस्य विवक्षितत्वात्। अल्पत्वस्य अस्फुटत्वपर्यवसानात्। तथा च अस्फुटव्यङ्ग्यस्यैव काव्यत्वस्वीकारेण सर्वथा व्यङ्ग्यशून्यस्य काव्यत्वानभ्युपगमात् न कोऽपि

विरोधः। तदुक्तम् अलङ्कारसुधानिधौ—'अनुल्बणत्वात् व्यङ्ग्यानाम् अव्यङ्ग्यं चित्रमीरितम्। व्यङ्ग्यस्यात्यन्तविच्छेदः काव्ये कुत्रापि नेष्यते' इति। महेश्वरन्यायालङ्कारास्तु 'अद्रावत्र प्रज्वलत्यग्निरुच्चैः प्राज्यः प्रोद्यन्नुलसत्येष धूमः' इत्यादौ नीरसादितया अकाव्यत्वेन स्वयं वक्ष्यमाणे अतिव्याप्तिवारणाय 'सरसौ' इति विशेषणं भंग्या दातुं 'सगुणौ' इति।

गुणा हि माधुर्यौजःप्रसादाख्यास्त्रयो रसवृत्तयः। रसत्व......कधर्माः। ते च रसद्वारैव काव्यवृत्तयः इत्यतो गुणवत्त्वद्वारभूतत्वेन रसस्थित्या 'सरसौ' इति पर्यवस्यति। न चैवं भावतदाभासादिध्वनौ अव्याप्तिः इति वाच्यम्। भावतदाभासादीनामपि रतिस्थायिभावकत्वेन रतिस्थायिभावकधर्मशृङ्गार-तुल्यकक्षत्वात्, तत्रापि माधुर्यगुणाङ्गीकारात्। एवं क्रोधमूलके विषादादिभावध्वनौ ओजोगुणस्य रतिमूलके तु माधुर्यस्याङ्गीकारात्। तद्वक्ष्यति 'रतिर्देवादिविषया व्यभिचारी तथाञ्जितः। भावः प्रोक्तः' इति। न चैवम् असूयादिव्यभिचारिध्वनौ अपि अव्याप्तिः। तत्र असूयादेरेव स्थायिभावत्वात् इति वाच्यम्। तत्रापि रसावश्यम्भावात्। परन्तु भावप्रतीतेः प्रौढत्वात् भावध्वनितया व्यवह्रियते। तदुक्तं—'न भावहीनोऽस्ति रसो न भावो रसवर्जितः। परस्परकृता सिद्धिः अनयो रसभावयोः' इति। एवं वस्त्वलङ्कारध्वनिगुणीभूतव्यङ्ग्यादावपि रसावश्यम्भावात् नाव्याप्तिः। अलङ्कारमात्रविशिष्टं चित्रकाव्यमपि ईषद्व्यङ्ग्यरसवत्त्वात् अव्याप्तिरहितमेव। तद्वक्ष्यति। 'शब्दचित्रं वाच्यचित्रम् अव्यङ्ग्यमधमं स्मृतम्' इति लक्षणे अव्यङ्ग्यमिति स्फुटप्रतीयमानार्थरहितम् इत्यर्थ' इति। प्रतीयमानार्थो व्यङ्ग्य इति स्फुटतद्राहित्यात् ईषत्तद्वत्ता अवगम्यत' इति।

इदमत्र विचार्यते। गुणत्वं चात्र जातिरखण्डोपाधिर्वा। तत्त्वे मानाभावात्। किं तु प्रकाशकारोक्तमेव तद्वाच्यम्। यथा "ये रसस्याङ्गिनो धर्माश्शौर्यादय इवात्मनः। उत्कर्षहेतवतः ते स्युः अचलस्थितयो मताः" इति। अङ्गिनः शरीरेष्वात्मवत् काव्ये प्राधान्येन स्थितस्य रसस्य धर्माः साक्षात् तदाश्रिताः इत्यर्थः। अचलस्थितयः इति अपृथक्स्थितयः अव्यभिचारिस्थितयः इति यावत्। अव्यभिचारश्च रसेन तदुपकारेण वा। तेन रसं विना ये नावतिष्ठन्ते अवतिष्ठमानाश्च अवश्यं रसम् उपकुर्वन्ति इत्यर्थः। अत एव अनयोर्व्यतिरेकम् अलङ्कारे वक्ष्यति।

एवञ्च रसोत्कर्षहेतुत्वे सति रसधर्मत्वम्। तथात्वे सति रसाव्यभिचारिस्थितित्वम्। अयोगव्यवच्छेदेन रसोपकारकत्वञ्च इति लक्षणत्रयं गुणानां द्रष्टव्यम्। तत्र प्रथमलक्षणे प्रमेय....वतिव्याप्तिवारणाय सत्यन्तम्। अलङ्कारेषु अतिव्याप्तिवारणाय विशेष्यम्। न च परम्परासम्बन्धेन अलङ्काराणामपि रसवृत्तित्वात् तत्र अतिव्याप्तिः दुर्वारैवेति वाच्यम्। साक्षाद्रसधर्मत्वस्यैव विवक्षितत्वेन दोषाभावात्। तच्च साक्षात्सम्बन्धावच्छिन्नरसनिरूपिताधेयतावत्वम्। स च सम्बन्धः समवायः तदन्यो वा इत्यन्यदेतत्। द्वितीयलक्षणेऽपि शृङ्गारत्वादौ अतिव्याप्तिवारणाय सत्यन्तम्। अलङ्कारादौ तद्वारणाय विशेष्यम्। ननु रसाव्यभिचारिस्थितित्वं रसात्यन्ताभाववदवृत्तित्वं तच्च माधुर्यादीनां न सम्भवति। रसे रसासत्वेन रसात्यन्ताभाववद्रसवृत्तित्वस्यैव सत्त्वात् इति वाच्यम्। रसभिन्नावृत्तित्वस्यैव विवक्षितत्वात्। तस्य तत्र अक्षतत्वेन दर्शितदोषानवकाशात्। वृत्तित्वञ्चात्र साक्षात्सम्बन्धावच्छिन्नमेव विवक्षणीयम्। तेन गुणानां परम्परासम्बन्धेन शब्दार्थवृत्तित्वेऽपि नासम्भवः। तृतीयलक्षणेऽपि अलङ्कारव्यावर्तनाय अयोगव्यवच्छेदेनेति। नियमेनेति तदर्थः। तथा च रसोपकारकत्वाभाववदन्यत्वं समुदितार्थः। नीरसे च काव्ये अलङ्काराणाम् उक्तिवैचित्र्यमात्रविश्रान्तत्वेन तत्र रसोपकारकत्वाभाववत्वेन तद्वदन्यत्वाभावात् नातिव्याप्तिः। शृङ्गारत्व(त्वा)दीनां च रसोपकारकत्वाभावात् न तत्रापि अतिप्रसङ्गः।

न च 'मधुरो वर्णः मधुरोऽर्थः' इत्यादिविश्वजनीनव्यवहारात् शब्दार्थवृत्तित्वमपि गुणानां साक्षात्सम्बन्धेनैव स्वीकर्तव्यम्। विनिगमकाभावात्। तथा च द्वितीयलक्षणं असम्भवग्रस्तम् इति वाच्यम्। रसमात्रवृत्तित्वे लाघवस्यैव विनिगमकत्वात्। शब्दार्थयोः मधुरत्वादिव्यवहारस्य उपचारेणैव उपपादनीयत्वात्।

तथा चाहुः प्रदीपकाराः 'ननु रसधर्मत्वमेषाम् असिद्धम्। कथमन्यथा नीरसेऽपि सुकुमारादिवर्णशालिनि मधुरादिव्यवहारः। रसवत्यपि ईदृग्वर्णाभाववति अमधुरादिव्यवहार इति' उच्यते। शौर्यादयस्तावत् आत्मन एव धर्माः इत्यविवादम्। दृश्यते तु क्वचिदशूरेऽपि आकारमहत्त्वादियोगिनि शूरव्यवहारः। शूरेऽपि आकारलाघवादियोगिनि अशूरत्वव्यवहारश्च। तत्कस्य हेतोः। अथ

क्वचित् शूरव्यवहारविषये वितताकृतिदर्शनात् 'आकार एवास्य शूर' इत्यौपचारिकव्यवहाराच्च आकार एव एतादृशः शूरपदवाच्यः' इति विपर्यासात् अदूरदर्शिनः तथा व्यवहरन्ति। तत्त्वज्ञास्तु क्वचिदुपचारत इति वक्तव्यम्। हन्तैवं मधुरादिरसयोगिनि सुकुमारादिवर्णयुक्ते मधुरादिव्यवहारात् 'वर्ण एवायं मधुरादिः' इत्यौपचारिकव्यपदेशाच्च अभियुक्तानां 'वर्ण एव एतादृशो माधुर्यभाक्' इति विपर्ययात् रसपर्यन्तावगाहिबुद्धिविधुरा व्यवहरन्ति। तत्त्वालोचिनस्तु क्वचिदुपचारात् इति तुल्यमेतत्। ननु शौर्यादेः आत्मवृत्तित्ववत् मधुरत्वादीनां रसवृत्तित्वव्यवस्थितौ एवं स्यात्। सैव तु असिद्धा। विनिगमकाभावादिति चेत् मैवम्। भवत्येव विनिगमकाभावः यदि त्वया वर्णमात्राश्रया गुणास्स्वीकर्तुं शक्यन्ते। नत्वेवम्। अविशेषेण रचनायामपि तदभ्युपगमात्। तथा च रसमात्रवृत्तित्वे लाघवम्। वर्णरचनोभयवृत्तित्वे तु गौरवम्। यतश्चैवम्, अतएव माधुर्यादयो रसधर्माः समुचितैः वर्णादिभिः व्यज्यन्ते इत्येव सम्यक् इति।

राजचूडामणिदीक्षिताश्च 'ननु एवं माधुर्यादिगुणानां रसधर्मत्वे कथम् 'अमी वर्णा मधुराः' इति माधुर्यस्य वर्णगतत्वव्यवहारः इति चेत्—यथा शौर्यादेः आत्मधर्मत्वेऽपि तदभिव्यञ्जकमूर्तौ शूरत्वव्यवहारः तथा रसाभिव्यञ्जकवर्णेषु मधुरत्वादिव्यवहारोपपत्तेः। न चैवं मधुररसाव्यञ्जकेषु वर्णेषु क्वचिदमधुरत्वव्यवहारश्च न स्यात्। दृश्येते च तथा व्यवहारौ इति चेत्—उच्यते। यथा हि अशूरेऽपि क्वचित् शूरोचिताकारविशेषदर्शनेन अयं शूर इत्यापातधियो व्यवहरन्ति। तथैव अमधुररसव्यञ्जकेष्वपि वर्णेषु...........दर्शनेन मधुरत्वव्यवहारोपपत्तेः। यथा च शूरेऽपि क्वचित् तदनुचितमूर्तिलाघवादिदर्शनेन अशूर इति व्यवहारः तथा मधुररसव्यञ्जकेष्वपि वर्णेषु तदुचितसौकुमार्यादर्शनेन अमधुरत्वव्यवहारश्च रसपर्यन्तविश्रान्तप्रतीतिविधुराणामुपपन्न एव। अत एव रसाव्यभिचारादेव रसधर्मा एव गुणा न वर्णधर्माः। समुचितैस्तु वर्णैः परं ते व्यज्यन्ते यथा च वर्णानां व्यञ्जकत्वं तथा उदाहरिष्यते। ननु 'मधुरोऽयं रसो' 'मधुराविमौ शब्दार्थौ' इति व्यपदेश्यप्रतीत्योः रसे शब्दार्थयोः तुल्यत्वात् विनिगमनाविरहाच्च कथं गुणस्य रसधर्मत्वम्। न तु शब्दार्थधर्मत्वं इति चेत्, न। एकवृत्त्यापि अपरत्र व्यवहारोपपत्तौ नोभयत्रापि तद्वृत्त्यभ्युपगमो युक्तः। ततश्च रसापेक्षया वर्णानामनेकत्वात् तत्तद्वर्णादिवृत्तित्वाभ्युपगमे गौरवात् रसमात्रवृत्तित्वमेव युक्तम्।

किं च शब्दार्थयोः नैकं माधुर्यं त्वया अभ्युपगन्तुं युक्तम्। वर्णमाधुर्येऽपि क्वचिदर्थस्य अमधुरत्वव्यवहारात्। क्वचिदर्थमाधुर्येऽपि शब्दस्य अमधुरत्वव्यवहाराच्च। तथा समासरचनादिष्वपि भिन्नमेव माधुर्यम् अङ्गीकार्यम्। शब्दार्थामाधुर्येऽपि समासादिषु माधुर्यप्रतीतिव्यपदेशयोः सत्वात्। ततश्च रसमात्राश्रयम् एकमेव माधुर्यं तथा। यथा सुखमात्मनिष्ठमपि 'शरीरे सुखं इति परम्परासम्बन्धेन शरीरनिष्ठतया भासते तथा काव्यात्मभूतरसनिष्ठमपि काव्यशरीरभूतशब्दार्थनिष्ठतयापि परम्परासम्बन्धेन भासते इत्यनवद्यम् इत्याहुः' इति।

तथा ध्वन्यालोके च आनन्दवर्धनाचार्याः 'गुणानां रसमात्रवृत्तितामेव उररीचक्रुः। 'तमर्थमवलम्बन्ते येऽङ्गिनं ते गुणास्स्मृताः। अङ्गाश्रितास्त्वलङ्कारा मन्तव्याः कटकादिवत्। ये तमर्थं रसादिलक्षणमङ्गिनं सन्तम् अवलम्बन्ते। ते गुणाः शौर्यादिवत्। वाच्यवाचकलक्षणानि अङ्गानि ये पुनराश्रिताः तेऽलङ्कारा मन्तव्याः कटकादिवत्' इति।

(अत्राभिनवगुप्तपादाचार्याः, अलङ्कार्यव्यतिरिक्तश्च अलङ्कारोऽभ्युपगन्तव्यः लोके तथा सिद्धत्वात्। य(त)था गुणिव्यतिरिक्तो गुणः। गुणालङ्कारव्यवहारश्च गुणिन्यलङ्कार्ये च सति। स चास्मत्पक्ष एवोपपन्नः इत्यभिप्रायेण आह—किं चेत्यादि। ननु शब्दार्थयोर्माधुर्यादयो गुणाः, तत्कथमुक्तं रसात्मकमङ्गिनं गुणा आश्रिताः इत्याशङ्क्य आह—तथा चेत्यादिना। तेन वक्ष्यमाणेन बुद्धिस्थेन परिहारप्रकारेणोपपद्यते चैतदित्यर्थः।)

तथा च 'शृङ्गार एव मधुरः परः प्रह्लादनो रसः। तन्मयं काव्यमाश्रित्य माधुर्यं प्रतितिष्ठति।' शृङ्गार एव रसान्तरापेक्षया मधुरः। प्रह्लादहेतुत्वात् प्रकाशनपरः। शब्दार्थयोः काव्यस्य स माधुर्यलक्षणो गुणः इति। अत्र लोचने श्रीमदभिनवगुप्तपादाचार्याः—'एतदुक्तं भवति। वस्तुतो माधुर्यं नाम शृङ्गारादेः रसस्यैव गुणः। तत् मधुराभिव्यञ्जकयोः शब्दार्थयोः उपचरितम्। मधुरशृङ्गाररसाभिव्यक्तिसमर्थता शब्दार्थयोः माधुर्यम् इति हि लक्षणम्' इति।

रसगङ्गाधरे जगन्नाथपण्डितराजस्तु—'येऽमी माधुर्यौजः प्रसादाः रसमात्रधर्मतयोक्ताः तेषां रसधर्मत्वे किं मानम्। प्रत्यक्षमेवेति चेत् न। दाहादेः कार्यात् अनलगतस्य उष्णस्पर्शस्य यथा भिन्नतया अनुभवः तथा

द्रुत्यादिचित्तवृत्तिभ्यो रसकार्येभ्यो अन्येषां रसगतगुणानाम् अननुभवात्। तादृशगुणविशिष्टरसानां द्रुत्यादिकारणत्वात् कारणतावच्छेदकतया गुणानाम् अनुमानम् इति चेत्—प्रातिस्विकरूपेणैव रसानां कारणतोपपत्तौ गुणकल्पने गौरवात्। शृङ्गारकरुणशान्तानां माधुर्यवत्त्वेन द्रुतिकारणत्वं प्रातिस्विकरूपेण कारणत्वकल्पनायेक्षया लघुभूतम् इति तु न वाच्यम्। परेण मधुरतरादिगुणानां पृथग्द्रुततरत्वादिकार्यतारतम्यप्रयोजकतया अभ्युपगमेन माधुर्यवत्त्वेन कारणताया गडुभूतत्वात्। इत्थं च प्रातिस्विकरूपेणैव कारणत्वे लाघवात्। किं चात्मनो निर्गुणतया आत्मरूपरसगुणत्वं माधुर्यादीनाम् अनुपपन्नम्। एवं तदुपाधिरत्यादिगुणत्वमपि। मानाभावात्। पररीत्या गुणे गुणान्तरस्यानौचित्याच्च। अथ 'शृङ्गारो मधुरः' इत्यादि व्यवहारः कथमिति चेत्—एवं तर्हि द्रुत्यादिचित्तवृत्तिप्रयोजकत्वं प्रयोजकतासम्बन्धेन द्रुत्यादिकमेव वा माधुर्यादिकमस्तु। व्यवहारस्तु वाजिगन्धा उष्णेति व्यवहारवदक्षतः। प्रयोजकत्वं च अदृष्टादिविलक्षणं शब्दार्थरचनागतमेव ग्राह्यम्। अतो न व्यवहारातिप्रसक्तिः। तथा च शब्दार्थयोरपि माधुर्यादेः ईदृशस्य सत्त्वात् उपचारो नैव कल्प्यः इति तु मादृशाः' इति व्याजह्रुः।

तन्न विचारसहम्। शृङ्गारादौ माधुर्यादेः गुणस्य सकलसहृदय-साक्षात्कारैकसाक्षिकस्य प्रतिक्षेपायोगात्। आह्लादकत्वं माधुर्यं शृङ्गारे द्रुतिकारणम् इत्याद्यभिधानेन द्रुत्यादिकारणतावच्छेदकतया च तत्सिद्धेः दुरपह्नत्वात्। द्रुत्यादिकं प्रति शृङ्गारत्वादिना प्रातिस्विकरूपेण कारणताकल्पने परस्परं व्यभिचारप्रसङ्गात्। स्वव्यवहितोत्तरत्वस्वसामानाधिकरण्योभयसम्बन्धेन शृङ्गारादिवैशिष्ट्यस्य कार्यतावच्छेदककोटौ निवेशेन व्यभिचारवारणे पुनः गौरवात्। माधुर्यवत्त्वेन शृङ्गारकरुणशान्तानां द्रुतिकारणताकल्पनस्यैव लघीयस्त्वात्। मधुरतरत्वादिगुणानां पृथग्द्रुततरत्वादिप्रयोजकत्वस्य 'करुणे विप्रलम्भे तच्छान्ते चातिशयान्वितम्' इत्युक्त्या अवश्यकल्पनीयत्वेऽपि सामान्यकार्यकारणभावस्याप्यवर्जनीयत्वात्। यद्धर्मव्याप्यधर्मावच्छिन्नयोः कार्यकारणभावः, असति बाधके तद्धर्मावच्छिन्नयोरपि सः इत्यर्थकस्य यद्विशेषयोः कार्यकारणभावः असति बाधके तत्सामान्ययोरपि इति न्यायस्यैव तत्र प्रमाणत्वात्। न च तादृशन्यायाङ्गीकारे प्रमाणाभाव इति वाच्यम्। लाघवस्यैव तदङ्गीकारे

मूलप्रमाणत्वात्। अन्यथा तत्तद्घटादौ तत्तद्दण्डत्वादिनैव दण्डादीनां कारणत्वेनैव निर्वाहात् घटत्वावच्छिन्नं प्रति दण्डत्वादिना तेषां कारणताकल्पने युक्त्यभावेन सर्वत्र सामान्यकार्यकारणभावस्यैव उच्छेदापत्तेः। तथा सति च तन्त्वादौ घटत्वावच्छिन्नोत्पत्त्यभावे तत्तद्दण्डत्वाद्यवच्छिन्नप्रतियोगिताकाभावकूटस्य प्रयोजकत्वकल्पने महागौरवापत्तेः। न हि तदा दण्डत्वावच्छिन्न-प्रतियोगिताकाभावस्य तत्कल्पनं सम्भवति। कारणतावच्छेदकावच्छिन्न-प्रतियोगिताकाभावस्यैव कार्यतावच्छेदकावच्छिन्नोत्पत्त्यभावप्रयोजकत्वनियमात्। दण्डत्वादेः तदनङ्गीकारात्। एवं च दण्डत्वादिना घटत्वाद्यवच्छिन्नं प्रति कारणत्वानङ्गीकारे दण्डत्वाद्यवच्छिन्नधर्मिकेष्टसाधनत्वग्रहासम्भवेन घटार्थिनः पुरुषस्य नियमेन दण्डत्वाद्यवच्छिन्नोपादानकप्रवृत्त्यभावप्रसङ्गश्च द्रष्टव्यः। प्रकृते च नीरसे सहृदयानां द्रुत्याद्यभावे शृङ्गारत्वादिप्रातिस्विकरूपावच्छिन्न-प्रतियोगिताकाभावकूटस्य प्रयोजकत्वकल्पने गौरवात्। शृङ्गारादौ माधुर्यादिगुणं स्वीकृत्य तत्र द्रुत्यादिकारणतावच्छेदकतां प्रकल्प्य तदनुरोधेन शृङ्गारादिनिष्ठमाधुर्यावच्छिन्नप्रतियोगिताकाभावस्य तत्प्रयोजकत्वकल्पनमेव युक्ततरं' लाघवात्। नैयायिकैः अन्यैश्च भेदवादिभिः आत्मनो गुणवत्त्वस्वीकारेण आत्मरूपरसे गुणाभ्युपगमे बाधकाभावात्। निर्गुणब्रह्मवादिनामद्वैतिनां मतेऽपि आन्दादेरिव माधुर्यादेरौपाधिकगुणत्वे कस्यापि दोषस्य अनवकाशात्। तदुक्तं पञ्चपादिकायां 'आनन्दो विषयानुभवो नित्यत्वं चेति सन्ति तद्धर्मा' इति। रत्याद्यवच्छिन्न.......रसत्वे तदुपाधिरत्यादिगुणत्वे बाधकाभावात्। नैयायिकादि—णे (मते गु) गुणानङ्गीकारेऽपि 'एकं रूपं रसात्पृथक्' इति विश्वजनीनप्रतीतिव्यवहाराभ्यां आलङ्कारिकैस्तदङ्गीकारे विरोधाभावात्। तादृशप्रतीतिव्यवहारयोः सामानाधिकरण्यादिरूपपरम्परासम्बन्ध-विषयकत्वकल्पन(स्य) अनुचितत्वात्। तथा च सति तथाविधपरम्परासम्बन्धेन रूपादावरूपादेः सत्वेन 'रूपं रूपवत् रसवत्' इत्यादिप्रतीत्यापत्तेः दुर्वारत्वात्। अलङ्कारशास्त्रस्य च भिन्नतन्त्रत्वेन तन्त्रान्तरविरोध(स्य) अकिञ्चित्करत्वात्। अत एव तन्मते सादृश्यस्यातिरिक्तपदार्थत्वं सम—तस्य सामास्वादिवृत्तित्वं (?) च स्वीकृतम्। तन्त्रान्तरविरोधेऽपि सङ्ग........विशेषस्य रसोत्कर्षाधायकत्वमात्रेण गुणत्वव्यवहारोऽयमालङ्कारिकाणां, न पुनः नैयायिकानामिवेति न

कश्चिदनुपपत्तिलेशोऽपि। इत्थं च माधुर्यवत्त्वेन शृङ्गारादेः द्रुत्यादिकारणत्वे लाघवात् रसमात्रवृत्तित्वे च गुणानां सिद्धे शब्दार्थरचनासु माधुर्यादिव्यवहारः उपचारमाश्रित्यैवोपपादनीय इति दिक्।

❖❖❖

Prof. Vempaty Kutumba Sastry is a well known Sanskrit Paṇḍita-Scholar with unique distinction of possessing in depth knowledge of traditional Śāstric lore in general and of Advaita Vedānta and Alaṅkāraśāstra in particular and possessing proven critical acumen to undertake research in critical and comparative studies. He has been the former Vice-Chancellor of Shree Somnath Sanskrit University, Veraval, Gir-Somnath, Gujarat. Formerly, he was the Vice-Chancellor of Rashtriya Sanskrit Sansthan, New Delhi and Sampurnanand Sanskrit Vishwavidyalaya, Varanasi. He has specialized in the Vedāntaśāstra, Alaṅkāraśāstra, Darśanas and Spoken Sanskrit. Blessed and honoured by Sringeri Sharada Peethadhipati Jagadguru Bharatiteertha Mahaswamiji and Kanchi Kamakoti Peethadhipati Jagadguru Shri Jayendra Saraswatiji, Prof. Sastry has been honoured with the ***Certificate of Honour*** by the President of India on 23rd March, 2015. He is the President of International Association of Sanskrit Studies, Paris form 2006 onwards.

9789383097159

ISBN : 978-93-83097-15-9

Price : ₹ 105-00